Ajita Prabhācārya
Shāntināthacaritram

UNIVERSITY OF TORONTO DUPL
3 1761 00382025 5

BL
1373
S45A6
1909
v.3

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No 1236.




# श्रीशान्तिनाथचरित्रम् ।

# ÇRĪ ÇANTINĀTHA CARITRA

BY

## ÇRĪ AJITA PRABHĀCĀRYA.

EDITED BY

**MUNI INDRAVIJAYA**

DISCIPLE OF

ÇĀSTRA VIÇĀRADA JAINĀCĀRYA

**ÇRĪ VIJAYA DHARMA SŪRI.**

FASCICULUS III.

Calcutta,

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
5, Nandakumar Choudhury's 2nd Lane.

AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 57, PARK STREET.

1910.

# LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

# ASIATIC SOCIETY OF BENGAL.

No. 57, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, Mr. BERNARD QUARITCH,

11, Grafton Street, New Bond Street, London, W., and Mr. Otto HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—*owing *of the Fasciculi being out of stock.*

## BIBLIOTHECA INDICA.

*Sanskrit Series*

| | Rs. | |
|---|---|---|
| *Advaita Brahma Siddhi, Fasc. 2, 4 @ /10/ each ... ... | | 1 4 |
| Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each ... ... | | 1 14 |
| *Agni Purāṇa, Fasc. 6-14 @ /10/ each ... ... ... | | 5 0 |
| Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-5 ; Vol. III. Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each ... ... ... | | 14 6 |
| Aitereya Lochana. ... ... ... ... ... ... | | 2 0 |
| *Anu Bhāshya, Fasc. 2-5 @ /10/ each ... ... ... | | 2 8 |
| Aphorisms of Śāṇḍilya, (English) Fasc. 1 @ 1/- ... ... ... | | 1 0 |
| Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each ... ... | | 3 12 |
| *Atharvana Upanishad, Fasc 4-5 @ /10/ each ... ... ... | | 1 4 |
| Atmatattaviveka, Fasc. I. @ /10/ each ... ... ... ... | | 0 10 |
| Aśvavaidyaka, Fasc. 1-5 @ /10/ each ... ... ... ... | | 3 2 |
| Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-6 ; Vol. II. Fasc. 1-5 @ 1/ each .. ... ... ... | | 11 0 |
| Bālam Bhaṭṭī, Vol. I, Fasc. 1-2, Vol 2, Fasc. 1 @ /10/ each ... ... | | 1 14 |
| Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-2 @ /10/ each ... | | 3 2 |
| *Bhāmatī, Fasc. 4-8 @ /10/ each ... ... ... | | 3 2 |
| Bhātta Dipikā Vol. I, Fasc. 1-6 ; Vol. 2, Fasc. 1, @ /10 each ... | | 4 6 |
| Baudhyostatrasangraha ... ... ... ... ... | | 2 0 |
| Brahma Sutra, Fasc. 1 @ /10/ each ... ... ... ... | | 0 10 |
| Brhaddēvatā Fasc. 1-4 @ /10/ each ... ... ... ... | | 2 8 |
| Brhaddharma Purāṇa Fasc 1-6 @ /10/ each ... ... ... | | 3 12 |
| Bodhisaryāvatāra of Çāntideva, Fasc. 1 5 @ /10/ each ... ... | | 3 2 |
| Cri Cantinatha Charita, Fasc. 1 ... ... ... ... | | 0 10 |
| Çatadūṣaṇī, Fasc. 1-2 @ /10/ each ... ... ... ... | | 1 4 |
| Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each ... ... | | 8 0 |
| Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. 1-5, Vol. III, Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each ... ... ... | | 14 6 |
| Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each ... ... ... | | 3 2 |
| Ditto Vol. VII, Fasc. 1-3 @ /10/ ... ... ... | | 1 14 |
| Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-12 @ /10/ each .. ... | | 7 8 |
| *Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25 : Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc 1-6 @ /10/ each .. ... | | 36 14 |
| Ditto Vol. 4, Fasc. 7. @ 1/4/ each ... ... ... | | 1 4 |
| Ditto Vol. IV, Fasc. 8, @ /10/ ... ... ... | | 0 10 |
| Çlockavartika, (English) Fasc. 1-7 @ 1/4/ each ... ... ... | | 8 12 |
| *Çrauta Sūtra of Āpastamba, Fasc. 12-17 @ /10/ each ... ... | | 3 12 |
| Ditto Çāṅkhāyana, Vol. I, Fasc. 1-7 ; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 ; Vol 4. Fasc. 1 @ /10/ each ... ... | | 10 0 |
| Çri Bhāshyam, Fasc 1-3 @ /10/ each ... ... ... | | 1 14 |
| Dāna Kriyā kaumudī, Fasc 1-2 @ /10/ each ... ... | | 1 4 |
| Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each ... ... | | 4 6 |
| Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each ... ... | | 3 2 |
| Gobhiliya Grihya Sutra, Vol I @ /10/ each ... ... ... | | 3 2 |
| Ditto Vol. II. Fasc. 1-2 @ 1/4/ each ... ... ... | | 2 8 |
| Haralata ... ... ... ... ... ... | | 1 14 |
| Karmapradiph, Fasc. I ... ... ... ... | | 1 4 |
| Kāla Viveka, Fasc. 1-7 @ /10/ each ... ... ... ... | | 4 6 |
| Kātantra, Fasc 1-6 @ /12/ each ... ... ... ... | | 4 8 |
| Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each ... ... | | 17 8 |
| *Kūrma Purāṇa, Fasc. 8-9 @ /10/ each ... ... ... ... | | 4 6 |
| Lalita-Vistara, (English) Fasc. 1-3 @ 1/- each ... ... ... | | 3 0 |
| Madana Pārijāta, Fasc. 1-11 @ /10/ each ... ... ... | | 6 14 |
| Mahā-bhāṣya pradīpōdyōta, Vol. I, Fasc. 1-9 ; Vol. II, Fasc. 1-12 Vol. III, ... ... | | 18 12 |

स्वयं तु स्वयशःकाङ्क्षी समारूढः स कुञ्जरम् ।
ययौ केशरिणः पार्श्वे शुभङ्करपुरस्सरः ॥ ६२ ॥
विदारिताऽऽस्यः सिंहोऽपि रक्ताक्षः सज्जितक्रमः ।
उत्पपातास्वरतले प्रपित्सुः पार्थिवोपरि ॥ ६३ ॥
मा भूद् मत्स्वामिनः पीडेति ध्यायन् स शुभङ्करः ।
निपतन्तं जघानैनं मुखे क्षिप्ताऽङ्कुशं गितम् ॥ ६४ ॥
राजोचे न त्वया साधु विदधे भोः शुभङ्कर ! ।
मया जिघांसितः सिंहो यत् चापल्याद् हतोऽन्तरा ॥६५॥
न केवलं मृगारातिस्त्वयाऽयं निहतोऽद्य रे ! ।
मध्ये सर्वनरेन्द्राणां मद्यशोऽपि हतं खलु ॥ ६६ ॥
सोऽवदद् भवतां देव ! देहापायाभिशङ्क्या ।
मया व्यापादितोऽयं हि न तु स्वोत्कर्षकाम्यया ॥ ६७ ॥
अन्यच्च निहतः स्वामि'प्रभावेणैव केशरी ।
अन्यथा मृगिमात्रेण कथमस्य निकृन्तनम् ? ॥ ६८ ॥
कथयिष्यामि सैन्यानामग्रे यत् स्वामिना स्वयम् ।
हयेत्तो निहतस्तत् त्वं माऽप्रसादं व्यधा मयि ॥ ६९ ॥
इदं कार्यं तु प्रत्यक्षमावयोरेव तत् प्रभो ! ।
चतुष्कर्णस्य मन्त्रस्य नास्य भेदो भविष्यति ॥ ७० ॥
राजा प्रोवाच यद्येष मन्त्रो भावी स्फुटः सखे ! ।
तदा मे भविता लोकेऽलीकवादिकलङ्कता ॥ ७१ ॥

BL
1373
S45A6
1909
V.3

---

(१) ङ ञ ट ण प्रमादेनैव ।

शुभङ्करोऽब्रवीत् किं न श्रुतमेतत् त्वया प्रभो ! ।
साधोः समर्पितं गुह्यं सह तेनैव दह्यते ॥ ७२ ॥
ततस्तौ सिंहमादाय सैन्यमध्ये समागतौ ।
इति व्यावर्णयामास तदग्रे च बटुः प्रभुम् ॥ ७३ ॥
त्यजन्ति यस्य नादेन मदं मत्तद्विपा अपि ।
लीलया निहतः [1]सोऽद्य स्वामिना नखरायुधः ॥ ७४ ॥
ततश्च पत्तिसामन्ताः संजातामितसंमदाः ।
शिरांसि धूनयन्तस्ते प्राशंसन् पौरुषं [2]प्रभोः ॥ ७५ ॥
भर्तुर्जयमहे तेऽथ संप्राप्ता नगरान्तरे ।
सुवर्द्धापनकं चक्रुस्तूर्यनादपुरस्सरम् ॥ ७६ ॥
महोत्सवमये तस्मिन्नतीते लघुवासरे ।
विसृज्याऽऽस्थानलोकं राट् ययौ देव्या निकेतनम् ॥ ७७ ॥
पप्रच्छ देवी नाथाद्य पुरे किं कश्चिदुत्सवः ? ।
वर्तते तूर्यनिर्घोषो यदयं श्रूयते महान् ॥ ७८ ॥
राजा प्रोवाच हे देवि ! यन्मया निहतो हरिः ।
ततोऽयं विहितो भूपैर्वर्द्धापनमहोत्सवः ॥ ७९ ॥
प्रत्यूचे सा पुनर्नाथोत्तमवंशोद्भवस्य ते ।
किमिदं युज्यते कर्तुं स्वस्याऽलोकप्रशंसनम् ? ॥ ८० ॥
शुभङ्करेण बटुना सिंहो व्यापादितो यतः ।
संवर्द्धनमहोऽकारि यशोलुब्धेन तु त्वया ॥ ८१ ॥

---

(१) ज स्रोऽपि । (२) ङ ज विभोः ।

तच्छ्रुत्वा भूपतिः क्रुद्धो दध्यौ तस्य दुरात्मनः ।
पश्य दुश्चरितं कीदृक् स्फुटं मिथ्याऽभिभाषिणः ॥ ८२ ॥
गुह्यं कस्यापि नाख्येयमित्युदित्वा पुरो मम ।
तदैव कथयामास देव्याः स्वोत्कर्षलम्पटः ॥ ८३ ॥
प्रच्छन्नं मारणीयोऽयं तन्मया मर्मभाषकः ।
इति ध्यात्वाऽऽरक्षकस्य शिक्षां तां प्रददौ नृपः ॥ ८४ ॥
तेन व्यापादितः सोऽथ निजगेहमुपागतः ।
सिद्धं तद् देव ! ते कार्यं भर्तुश्चेति निवेदितम् ॥ ८५ ॥
अन्यस्मिंश्च दिने देवी पप्रच्छ जगतीपतिम् ।
शुभङ्करबटुर्नाथ ! दृश्यते नाधुना कथम् ? ॥ ८६ ॥
बभाण भूपतिस्तस्य ग्राह्यं नामापि न प्रिये ! ।
सोचेऽपराद्धं किं तेन तव देव ! महात्मना ? ॥ ८७ ॥
ततस्तद्विषये राज्ञा स्वाभिप्राये निवेदिते ।
[1]तयोक्तं न ममाऽऽख्यातं तेनेदं सिंहमारणम् ॥ ८८ ॥
किं तु दृष्टं मयैवेदं प्रासादे सप्तभूमिके ।
आरूढया कौतुकेन नास्य दोषोऽत्र कश्चन ॥ ८९ ॥
देव ! सत्यं [2]समाख्याहि किं जीवति मृतोऽथ सः ? ।
इति पृष्टे तया भूपो भूयः सानुशयोऽवदत् ॥ ९० ॥
अकार्यं हा ! मया देवि ! कृतमद्य महत्तरम् ।
यदसौ घातितः सर्वगुणरत्ननिधिर्बटुः ॥ ९१ ॥

---

(१) ङ त द देव्योक्तम् । (२) ङ ममाख्या- ।

नास्ति मत्सदृशः कश्चिदविमर्शितकारकः ।
कृतोपकारं निघ्नंस्तं कृतघ्नोऽप्यहमेव हि ॥ ९२ ॥
अभाणि देव्या रभसकृतानामिह कर्मणाम् ।
विपाको हृदये दाही स्यादाजन्मापि शल्यवत् ॥ ९३ ॥
राजन् ! राचेर्विनोदाय कथितेयं कथा मया ।
कथायाः परमार्थस्तु श्लोकयुग्मेन कथ्यते ॥ ९४ ॥

तद्यथा—

भक्तः सर्वगुणैर्युक्तो हतो येन शुभङ्करः ।
कृतघ्नो भूतले शत्रुदमनात् कोऽपि नापरः ॥ ९५ ॥
अकारणोत्पन्नरोषे हिंसा निर्दोषमानुषे ।
कार्या नरेण नो शत्रुदमनेन कृता यथा ॥ ९६ ॥
आख्याय सत्कथामेतां गते यामे तृतीयके ।
रात्रेर्दुर्लभराजोऽपि समुत्थाय ययौ गृहम् ॥ ९७ ॥
तत्राऽऽसीनमथो कीर्तिराजं भूपतिरब्रवीत् ।
कार्यमेकं मामकीनं त्वया सेत्स्यति किं न वा ? ॥ ९८ ॥
सोऽप्यवोचत् न चेत् कार्यं साधयिष्यामि ते विभो ! ।
तत् त्वामाराधयिष्यामि चलस्नेहमहं कथम् ? ॥ ९९ ॥
भ्रातुः शीर्षमानयेति भणितः सोऽथ भूभुजा ।
गतप्रत्यागतं कृत्वा किञ्चिदूचे सुधीरिदम् ॥ ३०० ॥
शर्वर्याः प्रान्तकालत्वात् सर्वे जाग्रति यामिकाः ।
पुनः प्रस्तावे देवायं तवाऽऽदेशो विधास्यते ॥ १ ॥

सोऽपि प्रस्तावनां कृत्वाऽनुज्ञातः पृथिवीभुजा ।
कथां कथयति स्मैनां तस्य मन्युविनाशिनीम् ॥ २ ॥
इहाभूद् भरतक्षेत्रे महापुरपुरे नृपः ।
शत्रुञ्जयाभिधस्तस्य प्रियङ्गुरिति वल्लभा ॥ ३ ॥
अन्यदा नैगमः कश्चिद् जात्यमेकं तुरङ्गमम् ।
भूपतेर्ढौकयामास तस्य देशान्तरागतः ॥ ४ ॥
पृष्ठे पर्याणमाधाय तत्राऽऽरुह्य महीपतिः ।
वाहयामास वाहं तं गतिविज्ञानहेतवे ॥ ५ ॥
वेगात् प्रधाविते तस्मिन् तस्य शिक्षाविपर्ययम् ।
सामन्तानां समाचख्यौ स वणिग् पूर्वविस्मृतम् ॥ ६ ॥
ततोऽखिषु समारुह्याऽऽदाय भक्ष्यजलाऽऽदिकम् ।
गच्छन्तं तं महीपालमनुजग्मुः पदातयः ॥ ७ ॥
अथ वेगं निरुन्धाने पार्थिवे स तुरङ्गमः ।
तं जग्राह विशेषेण वैपरीत्येन शिक्षितः ॥ ८ ॥
आकुञ्चनेन वल्गायाः पाणिभ्यां रक्तमक्षरत् ।
भूपतिः सोऽथ निर्विण्णो मुमोच शिथिलामिमाम् ॥ ९ ॥
अश्वोऽप्यस्यां विमुक्तायां पदमात्रं चचाल न ।
ततो दुःशिक्षित इति तं विवेद महीपतिः ॥ १० ॥
तस्मादुत्तीर्य पर्याणमथापनयति स्म सः ।
जातत्रोटत्तुरङ्गोऽपि पतित्वा भूतले मृतः ॥ ११ ॥
भीमाटव्यामथो तस्यां दवदग्धवनान्तरे ।
तृष्णाक्षुधापीडिताङ्गो बभ्राम पृथिवीपतिः ॥ १२ ॥

वटमेकमथाऽद्राक्षीद् दीर्घशाखं सुविस्तृतम् ।
श्रान्तो गत्वा शनैस्तस्य च्छायायां निषसाद सः ॥ १३ ॥
पार्श्वावलोकनं तेन कुर्वाणेन निरीक्षिताः ।
तरोस्तस्यैव शाखायाः पतन्तो जलबिन्दवः ॥ १४ ॥
ततः सोऽचिन्तयदिदं वर्षाकालोद्भवं जलम् ।
शाखारन्ध्रे स्थितमियत्कालं पतति संप्रति ॥ १५ ॥
पलाशभाजनं सोऽथ कृत्वा तत्र न्यवेशयत् ।
क्रमेण पूरितं तत् चेषन्नीलकलुषाम्बुना ॥ १६ ॥
तद् गृहीत्वा नृपः पातुं यावदभ्युद्यतोऽभवत् ।
तावत् तत्राऽऽययौ पक्षी कश्चिदुत्तीर्य पादपात् ॥ १७ ॥
तद् नीरभाजनं तेन पातितं नृपतेः करात् ।
तथैव तरुशाखायां गत्वा तस्थौ च [1]स स्वयम् ॥ १८ ॥
विलक्षो भूपतिर्भूयः कृत्वा पूर्णं जलस्य तत् ।
यावत् पास्यति तेनैवापाति तावद् विहायसा ॥ १९ ॥
ततः प्रकुपितो भूपो दध्यौ भूयः समेष्यति ।
यद्येष पक्षी दुष्टाऽऽत्मा मारणीयस्तदा मया ॥ २० ॥
चिन्तयित्वेति जगृहे कशामेकेन पाणिना ।
जलार्थं स्थापयामास द्वितीयेन पुनः [2]पुटीम् ॥ २१ ॥
दध्यौ च विहगः सोऽथ कुपितोऽयं महीपतिः ।
चेत् पुटं पातयिष्यामि तद् मामेष हनिष्यति ॥ २२ ॥

---

(१) द सत्वरम् । (२) ज द पुडम् ।

नो चेद् विषे निपीतेऽस्मिन् मरिष्यत्येष निश्चितम् ।
ततो वरं विपन्नोऽहं न त्वसौ लोकपालकः ॥ २३ ॥
एवं विचिन्त्य भूयोऽपि पातितं तेन तत्करात् ।
कराऽऽघातेन राज्ञा च पक्षीन्द्रोऽपि निपातितः ॥ २४ ॥
पुनः प्रहृष्टचित्तेनास्थापि राज्ञा पुटोऽम्भसे ।
क्रमेण नीरकं तत् तु पतति स्माग्रतोऽग्रतः ॥ २५ ॥
ततश्चोत्थाय भूपालः किमेतदिति शङ्कितः ।
यावद् व्यलोकयत् तावद् ददर्शाजगरं तरौ ॥ २६ ॥
सोऽथ दध्यौ मुखादस्य सुप्तस्य गरलं किल ।
पतदेतदपास्यं चेदमरिष्यं तदा ध्रुवम् ॥ २७ ॥
पश्याहो ! पक्षिणाऽनेन चेष्टामाबिभ्रता सताम् ।
मम प्राणकृते प्राणास्तृणवत्कल्पिता निजाः ॥ २८ ॥
हा ! वृथा कोपयुक्तेन परमार्थमजानता ।
मया निष्ठुरचित्तेन हतः पक्षिवरोऽमता ॥ २९ ॥
इति खेदपरस्यास्य समेयुस्तत्र सैनिकाः ।
दृष्ट्वा स्वस्वामिनं ते च सद्यो मुमुदिरेतराम् ॥ ३० ॥
नीराऽऽहाराऽऽदिभिः स्वस्थीभूतोऽथ जगतीपतिः ।
पक्षिणं तं समादाय निजं पुरमथाऽऽययौ ॥ ३१ ॥
विधाय पक्षिदेहस्य दाहं चन्दनदारुभिः ।
दत्त्वा जलाञ्जलिं तस्य स आगाद् निजमन्दिरम् ॥ ३२ ॥
पृष्टो दुःखाऽऽसनस्थोऽसौ तत्र सामन्तमन्त्रिभिः ।
प्रेतकार्यं पक्षिणोऽपि कृतं स्वस्येव किं विभो ! ॥ ३३ ॥

ततो राजा निजां वार्तां यथावृत्तां न्यवेदयत् ।
पक्षिघातानुशयं च विसस्मार कदापि न ॥ ३४ ॥
यदेवमनुतापः स्यादविचारितकारिणाम् ।
ततो विचार्य कर्तव्यं कार्यं सुन्दरबुद्धिभिः ॥ ३५ ॥
कथयित्वा कथामेतां कीर्तिराजे स्थिते सति ।
प्रातस्तूर्यरवो जज्ञे पेठुर्मङ्गलपाठकाः ॥ ३६ ॥
अथोत्थाय ययौ कीर्तिराजो राजाऽप्यचिन्तयत् ।
हन्तैकचित्ताः सर्वेऽमी तद् न जातं ममेप्सितम् ॥ ३७ ॥
दास्यानीतजलेनाथ प्रक्षाल्य वदनं नृपः ।
कृत्वा सुवेषमास्थानमण्डपे निषसाद सः ॥ ३८ ॥
अत्रान्तरेऽलकन्यस्तकरद्वन्द्वः प्रसन्नवाक् ।
एत्य विज्ञापयामास देवराजो महीपतिम् ॥ ३९ ॥
यदि देवोऽनुजानाति किञ्चिद् विज्ञापयामि तत् ।
क्रुद्धेनाप्यमुना सोऽथानुज्ञातः संज्ञया भ्रुवोः ॥ ४० ॥
ततः पिशाचवचनश्रवणाऽऽदिकथाऽखिला ।
राज्ञोऽग्रे कथिता तेन भयविस्मयकारिणी ॥ ४१ ॥
आकृष्य वासभवनाद् द्विखण्डं तदहेर्वपुः ।
अदर्शि चास्य विद्वेषविषनाशनभेषजम् ॥ ४२ ॥
राजाऽथ चिन्तयामास हा ! अनेन महात्मना ।
मम जीवितरक्षार्थं विहितं पश्य कीदृशम् ? ॥ ४३ ॥
असमीक्षितकारित्वात् परोपकृतिकार्यपि ।
विघातयितुमारब्धो मयाऽसावपि पाप्मना ॥ ४४ ॥

एतैश्च वत्सराजाद्यैः कथाऽऽख्यानविचक्षणैः ।
तत् साधु विदधे यद् न निहतोऽयं नरोत्तमः ॥ ४५ ॥
ऊचे च स्वपरीवारमेते सर्वगुणाऽऽस्पदम् ।
कुलदेवतया दत्ता अपुत्रस्य सुता मम ॥ ४६ ॥
ततोऽहं स्थापयिष्यामि देवराजं महीपतिम् ।
कुमारं वत्सराजं च ग्रहीष्यामि व्रतं स्वयम् ॥ ४७ ॥
एवमाकर्ण्य [1]लोकेन प्रोक्तं देव ! प्रतीच्यताम् ।
कालं [2]कञ्चित् ततश्चान्त्यकाले कुर्या इदं खलु ॥ ४८ ॥
राजा प्रोवाच मद्वंश्या अदृष्टपलिता नृपाः ।
प्रतिपद्य व्रतं कृत्वा तपश्च सुगतिं गताः ॥ ४९ ॥
अहं पुनरियत्कालं स्थितो राज्यधरं विना ।
इदानीं तु करिष्यामि निश्चयेन समीहितम् ॥ ५० ॥
ततो दैवज्ञनिर्दिष्टे सुमुहूर्ते महीपतिः ।
देवराजं नृपं चक्रे कुमारं चापरं तथा ॥ ५१ ॥
अन्येद्युर्नन्दनवनोद्याने तत्र समाययौ ।
बहुशिष्यपरीवारः श्रीदत्त इति साधुराट् ॥ ५२ ॥
उद्यानपालकेनास्य समाख्याते समागमे ।
ववन्दे परया भक्त्या गत्वा तं जगतीपतिः ॥ ५३ ॥
उपविश्य यथास्थानं श्रुत्वा सद्धर्मदेशनाम् ।
संप्राप्यावसरं सोऽथ पप्रच्छैवं कृताञ्जलिः ॥ ५४ ॥

---

(१) द लोकैश्च । (२) ख घ ङ द किञ्चित् ।

प्रभो ! प्रोक्तः पिशाचाभ्यां यदि नाम ममाल्ययः ।
देवयोन्युदितस्यापि तस्याभूदल्ययः कथम् ॥ ५५ ॥
सूरिराख्यदहो राजन् ! गौरी नाम गृहास्तव ।
बभूव रूपसम्पन्ना वैश्यवंशसमुद्भवा ॥ ५६ ॥
कर्मदोषेण केनापि जाता दौर्भाग्यदूषिता ।
संजज्ञे सा तवाऽनिष्टा दृष्टा दृष्ट्याऽप्यसौख्यदा ॥ ५७ ॥
ततः सा जातवैराग्या गत्वा पितृगृहे निजे ।
अज्ञानतपसाऽऽत्मानं शोषयित्वा व्यपद्यत ॥ ५८ ॥
संप्राप्तव्यन्तरीभावा स्मृत्वा तं पूर्वमत्सरम् ।
अधिष्ठायौरगं कायं प्रविष्टा सा तवाऽऽलये ॥ ५९ ॥
कृत्वा पिशाचयो रूपं कुलदेवतया तव ।
ज्ञापितो देवराजोऽर्थममुं त्वत्क्षेमहेतवे ॥ ६० ॥
अचिन्त्या मानुषैर्दैवी शक्तिर्यद्यपि वर्त्तते ॥
तथापि पौरुषं तेजः क्षमं तद्भञ्जने यतः ॥ ६१ ॥
महाविषधरः क्रूरो व्यन्तर्याऽधिष्ठितोऽपि सः ।
बलिना देवराजेन लीलयैव हतस्ततः ॥ ६२ ॥ (युग्मम्)
सूरिं विज्ञपयामास पुनर्नत्वाऽथ भूपतिः ।
भाग्योदयेन मुक्तोऽहमसुखाद् व्यसनात् प्रभो ! ॥ ६३ ॥
भाग्यमेव ततः कर्तुं युज्यतेऽतः परं मम ।
तद् देहि दत्त ! सुव्रज्यां प्रव्रज्यां शुभदेहिनाम् ॥ ६४ ॥
ततश्च सूरिणा सूत्रविधानेनैष दीक्षितः ।
महाव्रतानि चारोप्य शिक्षितः सङ्घसाक्षिकम् ॥ ६५ ॥

स चास्य कथयामास प्रतिबोधविधायकम् ।
ज्ञाताधर्मकथाऽऽदिष्टं रम्यं भावि कथानकम् ॥ ६६ ॥
प्रसिद्धे मगधे देशे पुरे राजगृहाभिधे ।
धनो नामाभवत् श्रेष्ठी लक्ष्म्या वैश्यवणोपमः ॥ ६७ ॥
धारिणी गृहिणी तस्य सुतास्तत्कुक्षिसम्भवाः ।
पुरुषार्था इवाभूवन् चत्वारस्तस्य विश्रुताः ॥ ६८ ॥
प्रथमो धनपालाख्यो धनदेवो द्वितीयकः ।
धनगोपस्तृतीयश्च चतुर्थो धनरक्षितः ॥ ६९ ॥
उज्झिका भोगिका चैव धन्निका रोहिणी तथा ।
तेषां भार्याः क्रमेणैताः चतस्रो जज्ञिरे शुभाः ॥ ७० ॥
सुप्तजागरितोऽन्येद्युः स श्रेष्ठी धनसंज्ञकः ।
यामिन्याः पश्चिमे यामे चिन्तां चक्रे निजौकसः ॥ ७१ ॥
यथा सर्वगुणाऽऽधारैः पुरुषैर्वर्तते गृहम् ।
गृहिण्याऽपि तथैवेदं विदुः शास्त्रविदो यतः ॥ ७२ ॥
भुङ्क्ते गृहजने भुक्ते सुप्ते स्वपिति तच्च या ।
जागर्ति प्रथमं चास्मात् सा गृहस्यैव गेहिनी ॥ ७३ ॥
ततः परीक्ष्य जानामि स्वामिनी का भविष्यति ? ।
मध्याद् वधूनामेतासां गृहस्याधिगुणा मम ॥ ७४ ॥
विचिन्त्येति समादेशं [1]स्नुषाणां प्रददौ प्रगे ।
सारा रसवती सर्वा प्रगुणीक्रियतामिति ॥ ७५ ॥

---

(१) ख घ ङ स्नुषानां ।

तासां वधूनां स्वजनवर्गं सर्वं निमन्त्र्य तम् ।
पौरं चान्यजनं श्रेष्ठी भोजयामास गौरवात् ॥ ७६ ॥
संमान्य वस्त्रताम्बूलाऽऽदिभिः सर्वमथो जनम् ।
दत्त्वा शालिकणान् पञ्च प्रोचे ज्येष्ठवधूमिति ॥ ७७ ॥
प्रत्यक्षं सर्वलोकानां मया ह्येते तवार्पिताः ।
मार्गयामि यदैवाहमर्पणीया[1]स्तदा त्वया ! ॥ ७८ ॥
विसृष्टा तेन गत्वाऽथ विजने सेत्यचिन्तयत् ।
नूनं वृद्धस्वभावेन जातो मे श्वशुरो विधीः ॥ ७९ ॥
एवं मेलापकं कृत्वा दत्ता येन कणा इमे ।
अन्यान् तस्यार्पयिष्यामीति ध्यात्वा त्यजति स्म तान् ॥८०॥
एवं दत्ता द्वितीयस्याः साऽपि दध्यौ तथैव हि ।
परं सा वितुषान् कृत्वा कणान् भक्षयति स्म तान् ॥ ८१ ॥
तृतीयया तु संचिन्त्य कार्यमेतद् गुरोरिति ।
रक्षितास्ते सुवस्त्रेण बद्ध्वा भूषणमध्यगाः ॥ ८२ ॥
[2]ते कणास्तुर्यवद्वा च स्वबन्धूनां समर्पिताः ।
उप्ता वर्षासु संरूढा जाताश्चातिफलान्विताः ॥ ८३ ॥
प्रथमे वत्सरे तेषामभूत् प्रस्थोऽपरेषु च ।
संजाता बहवः कुम्भास्ततः कुम्भशतान्यपि ॥ ८४ ॥

---

(१) ङ -स्त्वया ।
(२) ङ चतुर्थी मनसि ध्यात्वा नीत्वा पञ्च कणानि च ।
गत्वा च पैतृके गेहे दापयति स्म निश्चला ॥ ८३ ॥

अभूवन् पञ्चमे वर्षे शालिपल्यशतान्यथ ।
पुनर्निमन्त्र्य लोकं तं श्रेष्ठी भोजयति स्म च ॥ ८५ ॥
मार्गयामास तान् पञ्च कणान् ज्येष्ठवधूं ततः ।
पल्यान्तरात् समानीयार्पयामास सकाऽपि तान् ॥ ८६ ॥
देवगुर्वादिशपथपूर्वं भणितया तया ।
तस्य सत्यं समाख्यातं रुष्टः श्रेष्ठी ततोऽवदत् ॥ ८७ ॥
मया समर्पिताः शालिकणा यद्यनयोज्झिताः ।
रजोभस्मगोमयाऽऽदि त्याज्यं तदनया गृहात् ॥ ८८ ॥
[1]पृष्ट्वा शालिकणोदन्तं द्वितीयाऽपि स्नुषाऽमुना ।
कृता रसवतीमुख्यगृहव्यापारकारिणी ॥ ८९ ॥
चक्रे वधू तृतीया च शालिरक्षाविधायिनी ।
मणिमौक्तिकहेमादिभाण्डागाराधिकारिणी ॥ ९० ॥
शालिवृद्धिकरी साऽथ चतुर्थी रोहिणी वधूः ।
गृहस्य स्वामिनी चक्रे श्रेष्ठिना दीर्घदर्शिना ॥ ९१ ॥
यथायुक्तविधानेन कृत्वैवं सुस्थितं गृहम् ।
निश्चितं स व्यधात् श्रेष्ठी धर्मव्यापारमन्वहम् ॥ ९२ ॥
श्रेष्ठितुल्यो गुरुर्ज्ञेयः स्नुषातुल्याश्च दीक्षिताः ।
योज्या महाव्रतानां च पञ्चशालिकणोपमाः ॥ ९३ ॥
सङ्घश्चतुर्विधोऽप्यत्र कुलमेलनसन्निभः ।
महाव्रतप्रदानं च तत्समक्षं विधीयते ॥ ९४ ॥

---

(१) ङ द्वितीयां भक्षितां ज्ञात्वा पाकस्थाने नियोजिता ।
तृतीयां रक्षितां ज्ञात्वा भाण्डागाराऽधिकारिणीम् ॥ ८९ ॥

उज्झकातुल्य आख्यातः शिष्यः त्यक्तव्रतो हि यः ।
इह लोके परलोके स भवेद् दुःखभाजनम् ॥ ९५ ॥
लिङ्गमात्रोपजीवी यः स द्वितीयसुषासमः ।
व्रतपालनसंप्रीतो भाण्डागारवधूपमः ॥ ९६ ॥
धर्मदेशनयाऽन्येषामप्यारोप्य व्रतानि यः ।
सूरिस्तद्दिकारी स्यात् स रोहिण्या समो मतः ॥ ९७ ॥
श्रीवीरजिनकालेऽदो भविष्यति कथानकम् ।
ततो व्रतानि पञ्चात्राऽधुना चत्वारि तानि तु ॥ ९८ ॥
एवं शिक्षाकथां श्रुत्वा जितशत्रुर्[1]महीपतिः ।
प्रव्रज्यां पालयामास श्रीदत्तगुरुसन्निधौ ॥ ९९ ॥
तद् भो भव्याः ! अहिंसाऽऽदिलक्षणं धर्ममुत्तमम् ।
परीक्ष्य विदधीतेति क्षेमङ्करजिनोऽब्रवीत् ॥ ४०० ॥
दुःखपर्वतदम्भोलिर्भाजनं सुखसन्ततेः ।
अहिंसा व्रतमुख्या सा स्वर्गमोक्षविधायिनी ॥ १ ॥
सत्येन लभ्यते कीर्तिः सत्यं विश्वासकारणम् ।
सत्यं जयति लोकेऽस्मिन् द्वितीयं धर्मलक्षणम् ॥ २ ॥
अदत्तत्यागतो नृणां राजदण्डो न जायते ।
विशिष्टजनसंयोगो निर्भयत्वं च जायते ॥ ३ ॥
ब्रह्मव्रतेन तेजस्वी सुभगश्च भवेद् नरः ।
नपुंसकत्वं तिर्यक्त्वं कदापि न लभेत च ॥ ४ ॥

---

(१) ज महासुनिः ।

अभिग्रहेण वितस्य चित्तं सन्तोषपूरितम् ।
मुक्तिश्च क्रमयोगेन जायते भव्यदेहिनः ॥ ५ ॥
एतेषु नियतं धर्मलक्षणेष्वपि पञ्चसु ।
यूयं महानुभावा भोः ! प्रयत्नं कुरुतान्वहम् ॥ ६ ॥
श्रुत्वेमां देशनां जीवाः प्रतिबुद्धा अनेकशः ।
प्रावर्ति च जिनेन्द्रेण तीर्थं गणधराऽऽदिकम् ॥ ७ ॥
वज्रायुधोऽपि धर्मस्य प्रतिपत्तिं विधाय ताम् ।
प्रणम्य भगवन्तं च प्रविवेश पुरीं निजाम् ॥ ८ ॥
अन्यदाऽऽयुधशालायां चक्ररत्नं सुनिर्मलम् ।
समुत्पन्नं तस्य यक्षसहस्राऽधिष्ठितं वरम् ॥ ९ ॥
विधायाष्टदिनान्यस्य पूजां तदनुगाम्यसौ ।
षट्खण्डं साधयामास विजयं मङ्गलावतीम् ॥ १० ॥
ततो निजपुरीं प्राप्तः चक्रवर्तिश्रियाऽञ्चितः ।
सहस्रायुधपुत्रं स यौवराज्ये न्यवेशयत् ॥ ११ ॥
अन्यदाऽऽस्थानमासीनः स वज्रायुधचक्रभृत् ।
अभूद् यावद् नृपामात्यपदातिपरिवारितः ॥ १२ ॥
तावद् नभस्तलात् कश्चिदेत्य विद्याधरो युवा ।
भयात् प्रकम्पमानाङ्गः शरणं तं समाश्रितः ॥ १३ ॥
तस्य पृष्ठे वरा काचित् खड्गखेटकधारिणी ।
आगाद् विद्याधरी विद्याधरश्चैको [1]गदाधरः ॥ १४ ॥

---

(१) ङ युवा पुनः ।

खेचरेणाऽमुना चक्री भणितः सपरिच्छदः ।
पापकर्म[1]कृतेरस्यापराधः श्रूयतामिति ॥ १५ ॥
अहं सुकच्छविजये वैताढ्ये शुक्लपूःस्थितेः ।
पुत्रः पवनवेगाख्यः शुक्लदत्तस्य भूपतेः ॥ १६ ॥
सुकान्ता नाम मे कान्ता तस्याः कुक्षिसमुद्भवा ।
एषा शान्तिमती नाम्ना मम पुत्री शुभाकृतिः ॥ १७ ॥
अथान्येद्युर्मया दत्तामिमां प्रज्ञप्तिसंज्ञिकाम् ।
ययौ साधयितुं विद्यां मणिसागरपर्वते ॥ १८ ॥
विद्यां प्रसाधयन्तीयं हृताऽनेन दुरात्मना ।
अत्रान्तरे च विद्या सा सिद्धाऽस्या भक्तिरञ्जिता ॥ १९ ॥
तस्या बिभ्यद् विवेशायं युष्माकं शरणे प्रभो ! ।
तत्रापश्यन् नगे पुत्रीमत्रागामहमप्यरम् ॥ २० ॥
तदेनं मत्सुताशीलविध्वंसनरुचिं बलात् ।
मुञ्च राजन् ! यथैकेन गदाऽऽघातेन हन्म्यहम् ॥ २१ ॥
अवधिज्ञानतो ज्ञात्वा तत्पूर्वभवचेष्टितम् ।
प्रतिबोधकृते तेषां चक्री वज्रायुधोऽब्रवीत् ॥ २२ ॥
कारणेन हृता येन पुत्री पवनवेग ! ते ।
खेचरेणाऽमुना तत् त्वं शृणुहं कथयामि भोः ! ॥ २३ ॥
विज्ञाय ज्ञानमाहात्म्यं सर्वे सभ्या निजप्रभोः ।
श्रोतुमभ्युद्यता जाताः स चाऽऽचख्यावितं स्फुटम् ॥ २४ ॥

---

(१) द -रते- ।

द्वीपस्यास्यैव विशदैरवतक्षेत्रमध्यगे ।
पुरे विन्ध्यपुरे राजा विन्ध्यदत्ताभिधोऽभवत् ॥ २५ ॥
पत्नी सुदक्षिणा तस्य जज्ञे तत्कुक्षिसम्भवः ।
तनयो नलिनकेतुरिति ख्यातो महीतले ॥ २६ ॥
तत्रैव नगरे धर्ममित्रसार्थपतेः सुतः ।
श्रीदत्ताकुक्षिसम्भूतो दत्तो नामाभवद् धनी ॥ २७ ॥
रूपेण रतिसङ्काशा कान्त्या चन्द्रप्रियासमा ।
जज्ञे प्रभङ्करानाम्नो दत्तस्य गृहिणी वरा ॥ २८ ॥
सुशृङ्गाररसमये वसन्तसमयेऽन्यदा ।
गत्वोद्यानवने दत्तः क्रीडति स्म तया सह ॥ २९ ॥
नृनाथतनयः सोऽथ दृष्ट्वा तां सुन्दराऽऽकृतिम् ।
बाणैर्विषमबाणस्य पञ्चभिस्ताडितो हृदि ॥ ३० ॥
स्वामित्वयौवनैश्वर्यगर्वितः सोऽथ तां ततः ।
अपजह्रेऽगणयित्वा कलङ्कं कुलशीलयोः ॥ ३१ ॥
भुङ्क्ते स्म विषयसुखं कुमारः स तया सह ।
दत्तश्च तद्वियोगार्तो ययावुद्यानमन्यदा ॥ ३२ ॥
सुसाधुः सुमनास्तत्र तत्कालोत्पन्नकेवलः ।
दृष्टोऽमुना वन्द्यमानो देवदानवमानवैः ॥ ३३ ॥
तेनापि वन्दितो भावसारं मुनिवरश्च सः ।
बोधयामास दत्तं तं धर्मदेशनयाऽग्रया ॥ ३४ ॥
कृत्वा दानाऽऽदिकं धर्मं मृत्वा चाऽऽयुःक्षयेऽथ सः ।
सुकच्छविजये वैताढ्याद्रौ विद्याधरेशितुः ॥ ३५ ॥

महेन्द्रविक्रमस्याऽभूत् तनयोऽजितसेनकः ।
तस्यापि कमलानाम्नी बभूव सहचारिणी ॥३६॥ (युग्मम्)
इतः स नलिनकेतू राज्यं संप्राप्य पैतृकम् ।
प्रभङ्कराऽऽख्यया सार्द्धं गृहवासमपालयत् ॥ ३७ ॥
अधिरूढोऽन्यदा भूमिं स्वप्रासादस्य सप्तमीम् ।
स ददर्शाञ्चितं मेघैः पञ्चवर्णैर्नभस्तलम् ॥ ३८ ॥
तस्य पश्यत एवेदं मेघवृन्दं सकौतुकम् ।
प्रचण्डपवनक्षिप्तं [1]खण्डखण्डं ययौ क्षणात् ॥ ३९ ॥
तद्दृष्ट्वा जातसंवेगः स दध्यौ द्रविणाऽऽदिकम् ।
सांसारिकमहो ! वस्तु सर्वमेतदिवाध्रुवम् ॥ ४० ॥
मयाऽज्ञानविमूढेन हरता हा ! परस्त्रियम् ।
क्षणिकस्य सुखस्यार्थे बहुपापमुपार्जितम् ॥ ४१ ॥
तत् प्रपद्य परिव्रज्यां तपोनियमवारिणा ।
पापकर्मविलिप्तं स्वं निर्मलं प्रकरोम्यहम् ॥ ४२ ॥
निवेश्य तनयं राज्ये सोऽथ त्यक्त्वा नृपश्रियम् ।
उपाददे परिव्रज्यां क्षेमङ्करजिनान्तिके ॥ ४३ ॥
विशुद्धां पालयित्वा तां समासाद्य च केवलम् ।
धौतकर्ममलः सिद्धिमासासाद स शुद्धधीः ॥ ४४ ॥
साऽपि प्रभङ्करानाम्नी तपः चान्द्रायणाभिधम् ।
गणिन्याः सुव्रताख्यायाः समीपे विदधेऽमलम् ॥ ४५ ॥

---

(१) ख घ ङ ञ खण्डखण्डैः ।

सेयं श्रुत्वा समुत्पन्ना पुत्री शान्तिमती तव ।
अस्याः प्राग्भवभर्ताऽयं खेचरोऽजितसेनकः ॥ ४६ ॥
[1]दृष्ट्वा विद्यां साधयन्तीं समुत्तिष्ठसा विहायसा ।
इयं पूर्वभवस्नेहमोहितेनाऽमुना ध्रुवम् ॥ ४७ ॥
ततः पवनवेग ! त्वं त्वं च शान्तिमति ! स्फुटम् ।
मुञ्च कोपं धृताटोपमस्योपरि निरर्थकम् ॥ ४८ ॥
इति वज्रायुधवाक्यं श्रुत्वा तौ सा च बालिका ।
अन्योन्यं चमयन्ति स्मापराधं प्रीतचेतसः ॥ ४९ ॥
पुनश्चक्री समाचख्यौ समुद्दिश्य सभाजनम् ।
अतीतमुक्तमेतेषां भविष्यत् कथयामि भोः ! ॥ ५० ॥
अमूभ्यां सहिता शान्तिमती दीक्षां ग्रहीष्यति ।
रत्नावलीतपः कृत्वाऽनशनेन विपत्स्यते ॥ ५१ ॥
साधिकसागरद्वन्द्वस्थितिर्वृषभवाहनः ।
स्वामी समस्तदेवानामीशानेन्द्रो भविष्यति ॥ ५२ ॥
वायुगत्यजितसेननाम्नोः साध्वोस्तदा पुनः ।
घातिकर्मेन्धने दग्धे भावि केवलमुत्तमम् ॥ ५३ ॥
केवलज्ञानमहिमां तयोः कृत्वाऽर्चनं तथा ।
स्वस्याङ्गस्य निजं स्थानमीशानेन्द्रो गमिष्यति ॥ ५४ ॥
इन्द्रोऽपि हि ततश्च्युत्वा कुले लब्ध्वा मनुष्यताम् ।
दीक्षां चाऽऽदाय निष्कर्मा निर्वाणं समवाप्स्यति ॥ ५५ ॥

---

(१) द दृष्ट्वा विद्यां साधयन्तीं ।

तच्छ्रुत्वा विस्मिताः सर्वेऽप्येवमूचुः सभासदः ।
अहो अस्मत्प्रभोर्ज्ञानं कालत्रितयदीपकम् ॥ ५६ ॥
साऽथ शान्तिमती वायुवेगश्चाऽजितसेनकः ।
त्रयोऽपि चक्रिणं नत्वा जग्मुस्ते स्थानमात्मनः ॥ ५७ ॥
कुमारस्य सहस्रायुधस्याथ तनयोऽभवत् ।
जवनाकुञ्जिसञ्ज्ञातो नाम्ना कनकशक्तिकः ॥ ५८ ॥
आद्या कनकमाला वसन्तसेना तथाऽपरा ।
उभे बभूवतुस्तस्य प्रिये तुल्यकुलोद्भवे ॥ ५९ ॥
क्रीडां कर्तुमथाऽन्येद्युः [1]स गतो गहनं वनम् ।
ददर्शैकं प्रकुर्वन्तं [2]पतनोत्पतनं नरम् ॥ ६० ॥
पृष्टोऽत्र कारणं तेन सोऽवदद् खेचरोऽस्म्यहम् ।
वैताढ्यवासी सर्वत्रास्खलितो विचरामि भोः ! ॥ ६१ ॥
इहागत्य चिरं स्थित्वा गच्छतः पुनरेव मे ।
पदमेकं खगामिन्या विद्याया भद्र ! विस्मृतम् ॥ ६२ ॥
ततो गन्तुमनीशोऽहं करोम्येवंविधक्रियाम् ।
कुमारः स्माऽऽह भोः ! तावत् पठ विद्यां ममाग्रतः ॥ ६३ ॥
विद्याधरोऽप्यपाठीत् तां सत्पुमानिति तत्पुरः ।
पदानुसारिलब्ध्या कुमारः पूरयति स्म तत् ॥ ६४ ॥
खेचरोऽथ कुमाराय स्वविद्यां प्रददौ मुदा ।
तेन प्रणीतविधिना साधयामास सोऽपि ताम् ॥ ६५ ॥

---

(१) ङ समगाद् । (२) घ ङ पतनोत्पतनम् ।

स्वस्थानमगमत् खेटः कुमारोऽपि यदृच्छया ।
विद्याबलेन बभ्राम प्रियाद्वययुतो भुवि ॥ ६६ ॥
हिमवल्लमथान्येद्युः शिलोच्चयमगादसौ ।
ददर्श चात्र विपुलमतिं विद्याधरं मुनिम् ॥ ६७ ॥
प्रणम्य चरणौ तस्य कुमारः प्रेयसीयुतः ।
निषसाद यथास्थानं मुनिश्चक्रे च देशनाम् ॥ ६८ ॥
कुलं रूपं कलाऽभ्यासो विद्या लक्ष्मीर्वराङ्गना ।
ऐश्वर्यं सुप्रभुत्वं च धर्मेणैव प्रजायते ॥ ६९ ॥
धर्मश्चतुर्विधो येन भवेत् पूर्वभवे कृतः ।
स मनोवाञ्छितं सर्वं लभते पुण्यसारवत् ॥ ७० ॥
पुण्यसारः प्रभो ! कोऽसाविति पृष्टोऽमुना मुनिः ।
तत्कथां कथयामास [1]प्रतिबोधविधायिनीम् ॥ ७१ ॥
अस्त्यत्र भरतक्षेत्रे जीवाजीवाऽऽदि[2]तत्त्ववत् ।
नानाऽद्भुतमनोहारि पुरं गोपालयाऽऽह्वयम् ॥ ७२ ॥
पुरन्दरसमश्रीको धर्मार्थी राजमानितः ।
महाजनस्य मुख्योऽभूत् तत्र श्रेष्ठी पुरन्दरः ॥ ७३ ॥
भक्त्या पत्यौ तथा देवे गुरौ गुणगणाऽन्विता ।
बभूव गेहिनी तस्य पुण्यश्रीरिति विश्रुता ॥ ७४ ॥
पतिवाल्लभ्यसौभाग्यभाग्यवत्याः शुभाऽऽकृतेः ।
अप्येकं दूषणं तस्याः शरीरे निरपत्यता ॥ ७५ ॥

---

(१) ज ट ढ प्रतिबोधकरीमिमाम् ।
(२) ज ट ढ -लोकवत् ।

वाञ्छन्नपि सुतं श्रेष्ठी भणितः स्वजनैरपि ।
तस्याः स्नेहपरो नारीं नान्यां परिणिनाय सः ॥ ७६ ॥
यत्तं भट्टारिकां वा नो काञ्चिदर्थयति स्म सः ।
नैवोपयाचितं चक्रे तयोः स्थिरसुदर्शनः ॥ ७७ ॥
सन्तानार्थी स चाऽन्येद्युरभ्यर्च्य कुलदेवताम् ।
उवाच सप्रियोऽप्येवं प्रणिपातमसंस्पृशन् ॥ ७८ ॥
अस्माकं पूर्वजैः सर्वैः पूजिता त्वं मयाऽपि च ।
इहलोकसुखस्याऽर्थे सर्वदा कुलदेवते ! ॥ ७९ ॥
अविद्यमानसन्ताने परलोकं गते मयि ।
पूजां बन्धुजनस्येव करिष्यति तवापि कः ? ॥ ८० ॥
तत्त्वं ज्ञात्वाऽवधिज्ञानेनाऽऽख्याहि मम सन्ततिम् ।
भविष्यत्यथवा नेति नान्यत्त्वामर्थयाम्यहम् ॥ ८१ ॥
देवतोवाच श्रेष्ठिन् ! ते भविष्यति सुतः खलु ।
धर्मे प्रवर्तमानस्य गते काले कियत्यपि ॥ ८२ ॥
ततः प्रहृष्टचित्तोऽसौ गृहवासमपालयत् ।
कुलक्रमाऽऽगतं धर्मं विशेषेण चकार [1]च ॥ ८३ ॥
कश्चित् पुण्याधिको जीवः सुतत्वेन समागमत् ।
कुक्षौ पुण्यश्रियोऽन्येद्युश्चन्द्रस्वप्नोपसूचितः ॥ ८४ ॥
तत्स्वप्नदर्शनं प्रातः स्वभर्त्रा ज्ञापितस्तया ।
तेनाऽप्याह्लादिता पुत्रजन्मना सा सुचेतसा ॥ ८५ ॥

---

(१) घ ज स्वः ।

जज्ञेऽथ समये तस्यास्तनयः शुभलक्षणः ।
तस्य जन्मनि तत्पित्रा विदधे च महोत्सवः ॥ ८३ ॥
पुण्यं कृत्वाऽयमायातः प्रायः पुण्येन वा मया ।
पुण्यसार इति नाम चक्रे तस्येति तत्पिता ॥ ८७ ॥
बालरक्षाविधावीभिर्धात्रीभिः परिपालितः ।
स पित्रोर्वल्लभतमो बभूवाऽध्ययनक्षमः ॥ ८८ ॥
उपाध्यायस्य वर्यस्य कलाग्रहणहेतवे ।
जनकेनार्पितो लेखशालाकृत्युत्सवेन सः ॥ ८९ ॥
तत्रैव नगरे रत्नसारस्य वणिजः सुता ।
बभूव बालिका रत्नसुन्दरी सुन्दराङ्गिका ॥ ९० ॥
अधीयानाऽथ तस्यैव कलाचार्यस्य सन्निधौ ।
जज्ञे महाध्यायिनी सा पुण्यसारस्य धीमती ॥ ९१ ॥
सा चापलेन महिला सुलभेन कलाविधौ ।
विवादं पुण्यसारेण सह चक्रे मनोरमा ॥ ९२ ॥
अन्यस्मिन् दिवसे तेन रुष्टेनैवमभाणि सा ।
बालिके ! पण्डितंमन्या यद्यप्यसि कलावती ॥ ९३ ॥
तथापि हि मया सार्द्धं विवादस्तव नोचितः ।
भविष्यसि यतो दासी पुरुषस्य गृहे खलु ॥ ९४ ॥ (युग्मम्)
साऽवदद् यदि रे ! दासी महाभाग्यस्य कस्यचित् ।
भविष्यामि नरस्याहं तदा मूढ ! भवतोऽत्र किम् ? ॥ ९५ ॥
गृह्णामि पुण्यसारोऽपि परिणीय बलादपि ।
करोमि किङ्करीं चेत त्वां तदाऽहं नियतं नरः ॥ ९६ ॥

वाञ्छन्नपि सुतं श्रेष्ठी भणितः स्वजनैरपि ।
तस्याः स्नेहपरो नारीं नान्यां परिणिनाय सः ॥ ७६ ॥
यत्तं भट्टारिकां वा नो काश्चिदर्थयति स्म सः ।
नैवोपयाचितं चक्रे तयोः स्थिरसुदर्शनः ॥ ७७ ॥
सन्तानार्थी स चाऽन्येद्युरभ्यर्च्च कुलदेवताम् ।
उवाच सप्रियोऽप्येवं प्रणिपातमसंस्पृशन् ॥ ७८ ॥
अस्माकं पूर्वजैः सर्वैः पूजिता त्वं मयाऽपि च ।
इहलोकसुखस्याऽर्थे सर्वदा कुलदेवते ! ॥ ७९ ॥
अविद्यमानसन्ताने परलोकं गते मयि ।
पूजां बन्धुजनस्येव करिष्यति तवापि कः ? ॥ ८० ॥
तत्त्वं ज्ञात्वाऽवधिज्ञानेनाऽऽख्याहि मम सन्ततिम् ।
भविष्यत्यथवा नेति नान्यत्त्वामर्थयाम्यहम् ॥ ८१ ॥
देवतोवाच श्रेष्ठिन् ! ते भविष्यति सुतः खलु ।
धर्मे प्रवर्तमानस्य गते काले कियत्यपि ॥ ८२ ॥
ततः प्रहृष्टचित्तोऽसौ गृहवासमपालयत् ।
कुलक्रमाऽऽगतं धर्मं विशेषेण चकार [1]च ॥ ८३ ॥
कश्चित् पुण्याधिको जीवः सुतत्वेन समागमत् ।
कुक्षौ पुण्यश्रियोऽन्येद्युश्चन्द्रस्वप्नोपसूचितः ॥ ८४ ॥
तत्स्वप्नदर्शनं प्रातः स्वभर्त्रा ज्ञापितस्तया ।
तेनाऽप्याह्लादिता पुत्रजन्मना सा सुचेतसा ॥ ८५ ॥

---

(१) घ ज मः ।

जज्ञेऽथ समये तस्यास्तनयः शुभलक्षणः ।
तस्य जन्मनि तत्पित्रा विदधे च महोत्सवः ॥ ८६ ॥
पुण्यं कृत्वाऽयमायातः प्राप्तः पुण्येन वा मया ।
पुण्यसार इति नाम चक्रे तस्येति तत्पिता ॥ ८७ ॥
बालरक्षाविधात्रीभिर्धात्रीभिः परिपालितः ।
स पित्रोर्वल्लभतमो बभूवाऽध्ययनक्षमः ॥ ८८ ॥
उपाध्यायस्य वर्यस्य कलाग्रहणहेतवे ।
जनकेनार्पितो लेखशालाकृत्युत्सवेन सः ॥ ८९ ॥
तत्रैव नगरे रत्नसारस्य वणिजः सुता ।
बभूव बालिका रत्नसुन्दरी सुन्दराङ्गका ॥ ९० ॥
अधीयानाऽथ तस्यैव कलाचार्यस्य सन्निधौ ।
जज्ञे सहाध्यायिनी सा पुण्यसारस्य धीमती ॥ ९१ ॥
सा चापलेन महिला सुलभेन कलाविधौ ।
विवादं पुण्यसारेण सह चक्रे मनोषिणी ॥ ९२ ॥
अन्यस्मिन् दिवसे तेन रुष्टेनैवमभाणि सा ।
बालिके ! पण्डितंमन्या यद्यप्यसि कलावती ॥ ९३ ॥
तथापि हि मया सार्द्धं विवादस्तव नोचितः ।
भविष्यसि यतो दासी पुरुषस्य गृहे खलु ॥ ९४ ॥ (युग्मम्)
साऽवदद् यदि रे ! दासी महाभाग्यस्य कस्यचित् ।
भविष्यामि नरस्याहं तदु मूढ ! भवतोऽत्र किम् ? ॥ ९५ ॥
शशंस पुण्यसारोऽपि परिणीय बलादपि ।
करोमि किङ्करीं चेत् त्वां तदाऽहं नियतं नरः ॥ ९६ ॥

भूयोऽपि माऽब्रवीद् सूर्ख ! बलात्कारेण जायते ।
स्नेहो नाऽन्यस्य कस्यापि दम्पत्योस्तु विशेषतः ॥ ९७ ॥
ततोऽसौ लेखशालायाः पुण्यसारो गतो गृहम् ।
सुष्वाप मन्युशय्यायां भूत्वा म्लानमुखोऽसुखी ॥ ९८ ॥
श्रेष्ठी पुरन्दरो वेश्म भोजनार्थमुपागतः ।
ज्ञात्वा तच्चेष्टितं तस्यान्तिकमेत्यैवमूचिवान् ॥ ९९ ॥
अयि वत्स ! कुतो हेतोरद्य श्यामसुखो भवान् ? ।
अकाले शयनं किं ते कारणं मे निवेदय ? ॥ ५०० ॥
निर्बन्धपृष्टः सोऽवोचत् तात ! मां रत्नसुन्दरीम् ।
परिणाययसि त्वं चेत् तदा स्वस्थो भवाम्यहम् ॥ १ ॥
भूयोऽभाषिष्ट तं श्रेष्ठी बालोऽस्यद्यापि वत्सक ! ।
कुरु तावत् कलाऽभ्यासं काले परिणये: स्नुषाम् ॥ २ ॥
पुत्रेण भणितं तात ! यदि तां याचसेऽधुना ।
मदर्थं तत्पितुः पार्श्वात् तदा भोक्ष्ये न चान्यथा ॥ ३ ॥
संबोध्य भोजयित्वा तं स्वयं भुक्त्वा च श्रेष्ठ्यसौ ।
बन्धुभिः सहितो रत्नसारश्रेष्ठिगृहं ययौ ॥ ४ ॥
अभ्युत्थानासनदानस्वागतप्रश्नपूर्वकम् ।
सोऽवदत् कारणं ब्रूत येन यूयमिहागताः ॥ ५ ॥
ऊचे पुरन्दरस्त्वत्तः कन्यकां रत्नसुन्दरीम् ।
याचितुं स्वसुतस्यार्थे श्रेष्ठिन् ! वयमुपागताः ॥ ६ ॥
अभ्यधाद् रत्नसारोऽपि कृत्यं यद् मम सर्वथा ।
युष्माभिर्विहितं तत् तद् देयाऽवश्यं सुता मया ॥ ७ ॥

यूयमत्र पुरे मुख्या याचितारः सुतां मम ।
महिता बन्धुभिश्चैभिस्तद् वाच्यं किमतः परम् ? ॥ ८ ॥
पितुः पार्श्वे स्थिता साऽथ कन्यका [1]सहसाऽवदत् ।
ताताहं पुण्यसारस्य भविष्यामि न गेहिनी ॥ ९ ॥
तस्यास्तद् वचनं श्रुत्वा दध्यावेवं पुरन्दरः ।
अहो ! मे तनयस्यास्यां व्यर्थः पाणिग्रहाग्रहः ॥ १० ॥
यस्या एवंविधा वाणी कर्कशा शैशवेऽप्यहो ! ।
भाविनी यौवनोन्मत्ता सा भर्तुः सुखदा कथम् ? ॥ ११ ॥
उवाच रत्नसारस्तु मुग्धेयं तनया मम ।
वाच्यावाच्यं न जानाति तदस्याः फल्गु जल्पितम् ॥ १२ ॥
तथाऽहं बोधयिष्यामि श्रेष्ठिन् ! ते तनयो यथा ।
परिणेष्यत्यमुं चैव मया दत्ता त्वसौ ध्रुवम् ॥ १३ ॥
ततः पुरन्दरः श्रेष्ठी गृहमागत्य तत्कथाम् ।
कथयित्वाऽवदत् पुत्रं वत्स ! सा तव नोचिता ॥ १४ ॥

यतः—

कुदेहां विगतस्नेहां लज्जाशीलकुलोज्झिताम् ।
अतिप्रचण्डां दुस्तुण्डां गृहिणीं परिवर्जयेत् ॥ १५ ॥
प्रत्यूचे पुण्यसारस्तु अमुं परिणयामि चेत् ।
भवामि तदहं सत्यप्रतिज्ञस्तात ! नान्यथा ॥ १६ ॥

---

(१) ङ चाब्रवीदिदम् ।
नाहं परिणयिष्यामि त्वेनं च श्रेष्ठिनः सुतम् ॥
श्रुत्वा त्वेवंविधां वाणीं कर्कशां शैशवेऽप्यहो ! ।

अपश्यन्नपरोपायं तल्लाभे सोऽथ बुद्धिमान् ।
[1]दृष्ट्वा तातं स्वदार्वीं तां विवेद कुलदेवताम् ॥ १७ ॥
ततः कुसुमनैवेद्यगन्धधूपविलेपनैः ।
अभ्यर्च्य सुविनीतात्मा प्रार्थयामास तामिति ॥ १८ ॥
दत्तोऽहं तुष्टया देवि ! श्रेष्ठिनस्तनयो यथा ।
सा त्वं वाञ्छां कलत्रस्य सकले ! पूरयाद्य मे ॥ १९ ॥
न चेत् पूरयसि स्वेच्छां मम त्वं कुलदेवते ! ।
अमत्रमपमानस्य ततोऽहं निर्मितः कथम् ? ॥ २० ॥
उत्थास्यामि तदैवाहमितः स्थानाद् यदीप्सितम् ।
पूरयिष्यसि देवि ! त्वं भोक्ष्ये चाहं तदैव हि ॥ २१ ॥
इत्थं कृतप्रतिज्ञेऽस्मिन् दिनमेकमुपोषिते ।
तुष्टा सोचे शनैर्वत्स ! सर्वं भव्यं भविष्यति ॥ २२ ॥
हृष्टचित्तस्ततः पुण्यसारो विहितभोजनः ।
अवशिष्टकलाऽभ्यासं विदधे जनकाऽऽज्ञया ॥ २३ ॥
समधीतकलः सोऽथोद्यौवनः श्रेष्ठिनन्दनः ।
केनचित् कर्मदोषेण दुरोदररतोऽभवत् ॥ २४ ॥
अतीववल्लभत्वेन पित्रभ्यामनिवारितः ।
स द्यूतव्यसनी जज्ञे निषिद्धो न व्यवर्तत ॥ २५ ॥
लक्षमूल्यमथान्येद्युः राज्ञोऽलङ्करणं गृहात् ।
हृत्वा दत्तं सभिकस्य खलचे हारितेऽमुना ॥ २६ ॥

---

(१) ङ दृष्ट्वा तां तत्प्राप्तिहेतोर्विवेद कुलदेवताम् ।

याचमाने नृपे श्रेष्ठी स्वानं यावद् व्यलोकयत् ।
तत्र तावददृष्ट्वा तद् मनस्येवमचिन्तयत् ॥ २७ ॥
गृहीतं पुण्यसारेण नूनमेतद् भविष्यति ।
अन्यस्य गूढमद्स्तूपादाने योग्यता न हि ॥ २८ ॥
यदर्थं खिद्यते लोकैः यत्नश्च क्रियते महान् ।
तेऽपि सन्तापदा एवं दुष्पुत्रा हा ! भवन्त्यहो ! ॥ २९ ॥
हारितं क्वापि तेनेदं चेद् भविष्यति तद् मया ।
गृहाद् निर्वासनीयोऽयं पुत्ररूपेण वैरिकः ॥ ३० ॥
एवं विचिन्त्य हृष्टेऽगात् श्रेष्ठी तत्रागतं सुतम् ।
पप्रच्छालङ्कृतेः शुद्धिं सोऽप्याचख्यौ यथातथम् ॥ ३१ ॥
ततः प्रकुपितः श्रेष्ठी तमूचे दुष्ट ! रे ! त्वया ।
तद्भूषणमुपादाय समागम्यं गृहे मम ॥ ३२ ॥
वचसा तर्जयित्वैवं धृत्वा च गलकन्दले ।
निरस्तस्तनयस्तेन गाढरोषवशेन सः ॥ ३३ ॥
तदा दिनावसानत्वात् अन्यतो गन्तुमक्षमः ।
पुरान्निस्सृत्य न्यग्रोधकोटरं प्रविवेश सः ॥ ३४ ॥
श्रेष्ठिन्या भणितः सोऽथ गृहं प्राप्तः पुरन्दरः ।
कथमद्य पुण्यसारो नायात्यद्यापि मन्दिरे ? ॥ ३५ ॥
राजभूषणवृत्तान्तमाख्यायैवमुवाच सः ।
मया निर्वासितः सोऽद्य प्रिये ! गिरापनाकृते ॥ ३६ ॥
सोचे निस्सारितो येन तनयो रजनीमुखे ।
स त्वं मे मुखमात्मीयं कथं दर्शयसि स्फुटम् ? ॥ ३७ ॥

बालं नेत्रविशालं तमेकतोकं त्वमात्मनः ।
अस्यां विकालवेलायां निरस्यन् लज्जसे न किम् ? ॥ ३८ ॥
तद्गच्छ वत्सके तस्मिन् समानीते गृहे मम ।
आगन्तव्यं त्वयाऽपीति स तया निरवास्यत ॥ ३९ ॥
[1]गेहिनीभर्त्सितः पुत्रं स्मृत्वा सोऽपि सुदुःखितः ।
सर्वत्राऽन्वेषयामास नगरे निजनन्दनम् ॥ ४० ॥
गृहं निर्मानुषं वीक्ष्य श्रेष्ठिनी सा व्यचिन्तयत् ।
निरासे हा ! मया गेहाद् पतिः कोपपरीतया ॥ ४१ ॥
पुत्रापायकृता पूर्वं मूर्खता श्रेष्ठिना कृता ।
निरस्यन्त्या स्वभर्तारं पश्चात् चक्रे मयाऽपि सा ॥ ४२ ॥
एवं चिन्ताऽऽतुरा सास्रा तयोर्मार्गावलोकनम् ।
कुर्वाणोर्द्वतनुः साऽस्याद् द्वारदेशे स्ववेश्मनः ॥ ४३ ॥
ददर्श पुण्यसारोऽथ तत्रोभे देवते निशि ।
स्वरोचिषा तमोहन्त्र्यौ शुश्रावेति च तद्गिरम् ॥ ४४ ॥
एका स्माह सखः ! किं न स्वेच्छया भ्राम्यते भुवि ? ।
वर्तते यदियं रात्रिरस्मत्पक्षकृतोदया ॥ ४५ ॥
द्वितीयोवाच किं व्यर्थं भ्रान्त्याऽऽत्मा खेद्यते हले ! ।
दृश्यते कौतुकं क्वाऽपि यदि तत्रैव गम्यते ॥ ४६ ॥
साऽवदत् कौतुकं तर्हि गच्छामो [2]वलभीपुरे ।

---

(१) ज द गेहिन्या भर्त्सितः ।

(२) वलभीपुरस्य यत्र यत्र प्रसङ्गस्तत्र तत्र वल्लभीतिलकारहयविशेषोऽपि पाठो दृश्यते क्वचित् ।

श्रेष्ठी वसति यत् तत्र धनप्रवरनामकः ॥ ४७ ॥
[1]जाता धनवतीकुक्षिसम्भवाः तस्य कन्यकाः ।
सप्तैताः सन्ति चार्वङ्ग्यस्तत्राऽऽद्या धर्मसुन्दरी ॥ ४८ ॥
धनसुन्दर्यथो कामसुन्दरी मुक्तिसुन्दरी ।
भाग्यसौभाग्यसुन्दर्यौ सप्तमी गुणसुन्दरी ॥ ४९ ॥
वरप्राप्तिकृते तासां श्रेष्ठिना भक्तिपूर्वकम् ।
आराध्य तोषितो लम्बोदरो मोदकदानतः ॥ ५० ॥
प्रत्यक्षीभूय सोऽवोचदितः सप्तमवासरे ।
रात्रौ सुलग्नवेलायां संयोगे प्रगुणीकृते ॥ ५१ ॥
सुवेषयोषायुगलपृष्ठे यः कश्चिदेष्यति ।
श्रेष्ठिन् ! तव सुतानां स भविष्यत्युचितो वरः ॥ ५२ ॥
सेयं सप्तमघस्रस्य रात्रिस्तत् तत्र गम्यते ।
निवासपादपश्चायं नीयते च सहाऽऽत्मना ॥ ५३ ॥
दध्यौ स पुण्यसारोऽथ तदाकर्ण्य मनस्यदः ।
अहो ! प्रासङ्गिकं मेऽपि भावि कौतूहलेक्षणम् ॥ ५४ ॥
कीदृशी वलभी सा पूः कीदृग् लम्बोदरः स च ? ।
कीदृक्षाः कन्यकाश्चेति सर्वं द्रष्टास्मि कौतुकम् ॥ ५५ ॥
विधाय हुंकृतिं ताभ्यामुत्क्षिप्तो वटपादपः ।
उद्याने वलभीपुर्याः गत्वा तस्थौ क्षणेन सः ॥ ५६ ॥
विधाय नायिकारूपं चेलतुर्[2]देवते ततः ।
तयोरनुपदं पुण्यसारोऽपि चलति स्म सः ॥ ५७ ॥

(१) ङ ततो-। (२) ङ -ः कुलदेवते ।

लम्बोदरगृहद्वारे वेदिकामण्डपे कृते ।
मेलितस्वजनः श्रेष्ठी यावदासीत् सुताऽन्वितः ॥ ५८ ॥
तावत् ते देवते तस्य समीपेन प्रजग्मतुः ।
श्रेष्ठावासे रसवत्या रसग्रहणहेतवे ॥ ५९ ॥ ( युग्मम् )
एते अनुव्रजन् पुण्यसारः श्रेष्ठिवरेण सः ।
दृष्ट्वे भणितश्चैवं निवेश्य प्रवराऽऽसने ॥ ६० ॥
लम्बोदरेण भद्र ! त्वं जामाता परिकल्पितः ।
एता मम सुताः सप्त तत्त्वं परिणयानघ ! ॥ ६१ ॥
इत्युदित्वा सुवसने नवीने परिधापितः ।
लक्षमूल्यभूषणैनालङ्कृतः श्रेष्ठिना च सः ॥ ६२ ॥
ततो भवत्सु धवलमङ्गलेष्वग्निसाक्षिकम् ।
परिणीताः चारु कन्याः पुरन्दरसुतेन ताः ॥ ६३ ॥
सोऽथ दध्यावदो युक्तं पित्रा निर्वासितोऽस्मि यत् ।
अन्यथैवं कथं पुण्यसारनाम स्फुटीभवेत् ? ॥ ६४ ॥
इति ध्यायन् कृतोद्वाहः स वधूभिः समन्वितः ।
श्रेष्ठिना स्वगृहं निन्ये महोत्सवपुरस्सरम् ॥ ६५ ॥
प्रासादस्योपरितनभूमौ नीत्वा निवेशितः ।
वल्लभाभिः स पर्यङ्के निविष्टास्ताश्च विष्टरे ॥ ६६ ॥
पृच्छन्ति स्म कलाऽभ्यासस्तव नाथ ! कियानिति ? ।
सोऽब्रवीत् सकला मुग्धाः ! मम नेष्टतरा यतः ॥ ६७ ॥
अत्यन्तं विदुषां नैव सुखं मूर्खनृणां न च ।
उपार्जयत तद् यूयं सर्वथा मध्यमां कलाम् ॥ ६८ ॥

यावत् ता न विदन्ति स्म श्लोकस्यार्थमपि स्फुटम् ।
तावत् स दध्यौ वृत्तोऽसौ गमिष्यति सदैवतः ॥ ६९ ॥
इति गन्तुमनाः सोऽथ दिशाऽऽलो[1]कादिचेष्टया ।
विज्ञातो गुणसुन्दर्या तया दारकनिष्ठया ॥ ७० ॥
किमङ्ग ! चिन्तां कर्तुं ते शङ्काऽस्तीति तयोदितः ? ।
सोऽब्रवीदेवमेवेति दत्तहस्तस्तया ततः ॥ ७१ ॥
अधोभूमौ समागत्य स्वस्य ज्ञापनहेतवे ।
इति श्लोकं तुलायां स सुधीः खडिकयाऽलिखत् ॥ ७२ ॥
[2]किहां गोवालो किहां वलहिपुरं किहां लम्बोदरदेव ? ।
लाडन आयो विहिवसिं गिओ सत्तइ परिणेवि ॥ ७३ ॥
गोपालयपुरादागां वलभ्यां नियतेर्वशात् ।
परिणीय वधूः सप्त पुनस्तत्र गतोऽस्म्यहम् ॥ ७४ ॥
साऽर्थमग्रेतनस्याऽपि श्लोकस्याविदुषी तदा ।
लज्जमानाऽनुष्टुभं तं प्रसन्नं नाऽप्यवाचयत् ॥ ७५ ॥
गृहद्वारगतः सोऽथ तामूवे गुणसुन्दरीम् ।
सुखेन तनुचिन्ता स्यादतिनिर्विजने मम ॥ ७६ ॥
ततस्त्वयाऽत्र स्थातव्यमहं त्वन्निकटे गतः ।
निराबाधो भविष्यामीत्युक्ता तत्र वटे ययौ ॥ ७७ ॥

---

(१) ङ -लोकनचे- ।

(२) गूर्जरभाषानिबद्धेयं प्रतिभासते तथा केषु च पुस्तकेषु नोपलभ्यते ।

तत्कोटरप्रविष्टेऽस्मिन्[1] नित्यतुर्देवते अपि ।
तच्छक्त्योत्पाटितः सोऽथ वटः स्वस्थानमागमत् ॥ ७८ ॥
इतः पुरन्दरः श्रेष्ठी भ्रामं भ्रामं पुरेऽखिले ।
निशान्तेऽतीवनिर्विण्णो यावत् तत्र समाययौ ॥ ७९ ॥
तावत् सा विगता रात्रिः प्रणष्टं क्वापि तत् तमः ।
ततो विभातं न्यग्रोधे गतस्येत्युचते जनैः ॥ ८० ॥
निर्ययौ पुण्यसारोऽथ तदानीं वटकोटरात् ।
वस्त्रालङ्कारसाराङ्गः पित्रवक्त्राम्बुजार्यमा ॥ ८१ ॥
पुत्रमत्यद्भुतश्रीकं दृष्ट्वा श्रेष्ठी सविस्मयः ।
वत्स ! वत्सेति जल्पन्तमालिलिङ्ग ससंभ्रमम् ॥ ८२ ॥
ततः स्वगेहमायातः [2]सह तेन विलोक्य तौ ।
बभूव श्रेष्ठिनी हृष्टा स्पृष्टा रुच्येव शीतगोः ॥ ८३ ॥
गाढमालिङ्ग्य सस्नेहं तमुत्सङ्गे निवेश्य च ।
पप्रच्छ वत्स ! शोभेयं संजाता क्व तवेदृशी ? ॥ ८४ ॥
ऊचे च जनकोऽप्येवं ततोऽसौ सकलां कथाम् ।
तदग्रे कथयामास महद्विस्मयकारिणीम् ॥ ८५ ॥
तावेवमूचतुर्भाग्यमहो ! वत्सस्य कीदृशम् ? ।
ऋद्धिर्येनेदृशी लब्धा रात्रिमध्येऽप्यचिन्तिता ॥ ८६ ॥
बभाण जनको भूयः क्षन्तव्यं वत्स ! तत् त्वया ।
मया विरूपं यत् किञ्चिदुक्तं शिक्षापनाकृते ॥ ८७ ॥

---

(१) ङ -ऽस्मिन्नीयतुः । (२) ङ सहसैव ।

पुण्यसारोऽवदत् तात ! युष्मत्शिक्षापनैव हि ।
संजाता हेतुरीदृश्याः[1] सम्पदो नियतं मम ॥ ८८ ॥
दत्त्वाऽथ[2] द्यूतकारस्य [3]तदानीतं विभूषणम् ।
नृपसत्कं नृपस्यैवार्पयामास पुरन्दरः ॥ ८९ ॥
विदधे पुण्यसारोऽथ हट्टव्यापारमुत्तमम् ।
दूरं विहाय तद् द्यूतव्यसनं गुणनाशनम् ॥ ९० ॥
इतस्तस्मिन्ननायाते[4] वलित्वा गुणसुन्दरी ।
सोदरीणां समाचख्यौ सर्वासामपि तद्गतिम् ॥ ९१ ॥
ततस्ता नवगेहान्तर्धूमांसक इवोत्कटे ।
आकस्मिकेऽसुखे तस्मिन् पतिते रुरुदुर्भृशम् ॥ ९२ ॥
आकर्ण्य रुदितं पित्रा पृष्टास्तस्य च कारणम् ।
कथयन्ति स्म तास्तस्य तत्पत्युरपवारणम् ॥ ९३ ॥
सोऽब्रवीदपरिज्ञातपारम्पर्यो निजः पतिः ।
किं न सम्भूय युष्माभिर्धृतो ज्ञात्वा तदाशयम् ? ॥ ९४ ॥
रूपलावण्ययुक्ताभिः स्त्रीभिः सर्वोऽपि लुभ्यते ।
तद् भवत्यः प्रियास्तेन प्राप्ताः परिहृताः कथम् ? ॥ ९५ ॥
यदङ्गलग्नमादाय भूषणं गतवानसौ ।
तद् मन्ये व्यसनी कोऽपि व्यंसको वा भविष्यति ? ॥ ९६ ॥
दत्तो लम्बोदरेणाऽपि यदेवमकरोदसौ ।
तद् नूनं दुष्कृतं किञ्चित् पुरा चीर्णमिदं हि वः ॥ ९७ ॥

---

(१) घ -रीदृक्ष- । (३) द तदानीं तद्विभूषणम् ।
(२) ख ङ दत्त्वाऽर्थं । (४) घ च ट द -नायाति ।

विज्ञातं किं न युष्माभिः कुर्वतीभिः कथामिमाम् ।
तस्याभिधानं स्थानं वा स्वरूपमपरं तथा ? ॥ ९८ ॥
गुणसुन्दर्यथोवाच दीपोद्द्योते तदाऽमुना ।
अस्त्यत्र लिखितं किञ्चिद् वाचितं तद् मया न तु ॥ ९९ ॥
अथ प्रभाते संजाते श्लोके तस्मिंश्च वाचिते ।
सोचे गोपालयपुरे गतस्तात ! पतिः स नः ॥ ६०० ॥
केनचिद् दैवयोगेन रात्रान्ते स इहाऽऽगतः ।
त्वद्दत्ताः परिणीयास्मान् तत्रैव हि पुनर्गतः ॥ १ ॥
ततस्त्वं निजहस्तेन नरवेषं ममार्पय ।
मेलयित्वा महासार्थं यतस्तत्र व्रजाम्यहम् ॥ २ ॥
ज्ञास्यामि तं निजं कान्तं तत्राऽन्विष्य कथञ्चन ।
षण्मासाभ्यन्तरे वङ्किरन्यथा शरणं मम ॥ ३ ॥
पित्राऽर्पितनृवेषा सा महासार्थसमन्विता ।
ययौ गोपालयपुरे कियद्भिर्दिवसैस्ततः ॥ ४ ॥
गुणसुन्दराभिधानः कश्चित् सार्थपतेः सुतः ।
इत्यसौ नगरे तस्मिन् मानितः पृथिवीभुजा ॥ ५ ॥
[1]क्रयविक्रयादि चक्रे व्यवहारं वणिग्घितम् ।
समं च पुण्यसारेण मैत्रीलं वचनाऽऽदिभिः ॥ ६ ॥ (युग्मम्)
अथोचे रत्नसारं स्ववसारं रत्नसुन्दरी ।
यद् मया परिणेतव्यस्तातायं गुणसुन्दरः ॥ ७ ॥

---

(१) ख घ ङ ञ्चेत्य । (२) घ ङ -विक्रयादिं ।

विज्ञाय दुहितुर्भावं रत्नसारस्तदन्तिकम् ।
गत्वोवाच मम सुता भर्तारं त्वां समीहते ॥ ८ ॥
गुणसुन्दर्यथो दध्यावस्या वाञ्छा निरर्थिका ।
द्वयोर्महिलयोर्यस्माद् गृहवासः कथं भवेत् ? ॥ ९ ॥
यत् किञ्चिदुत्तरं कृत्वा तदेतां वारयाम्यहम् ।
अन्यथा या गतिर्मेऽस्ति साऽस्या अपि भविष्यति ॥ १० ॥
एवं विचिन्त्य मनसा साऽवदत् श्रेष्ठिपुङ्गवम् ।
अस्मिन्नर्थे कुलीनानां पित्रोरेव प्रधानता ॥ ११ ॥
वर्तेते तौ च मे दूरे तत् त्वया निजनन्दिनी ।
प्रदेयाऽन्यस्य कस्यापि प्रत्यासन्ननिवासिनः ॥ १२ ॥
अभाणि रत्नसारेण मत्पुत्र्यास्त्वं हि वल्लभः ।
सा देया कथमन्यस्मै पुरुषाय मया यतः ? ॥ १३ ॥
शत्रुभिर्बन्धुरूपैः सा प्रक्षिप्ता दुःखसागरे ।
या दत्ता हृदयानिष्टरमणस्य कुलाङ्गना ॥ १४ ॥
अनुमेनेऽथ तद्वाक्यं सागरं साऽसुनोदिता ।
तयोर्विवाहश्चक्रे च श्रेष्ठिना पुण्यवासरे ॥ १५ ॥
पुण्यसारस्तदाकर्ण्य कुलदेव्याः पुरो गतः ।
शिरः क्षुरिकया छेत्तुमारेभे मानिनां वरः ॥ १६ ॥
साहसं किं करोष्येतदिति देवतयोदितः ? ।
स स्माह पर्यणैषीद् यद् कन्यामन्यो मयेप्सिताम् ॥ १७ ॥
पुनरेष तयाऽभाणि या दत्ता वत्स ! ते मया ।
भाविनी सा तवैवैषा मा विधा मृत्युसाहसम् ॥ १८ ॥

सोऽवदद् युज्यते कर्तुं परस्त्रीसंग्रहो न मे ।
इयं च परिणीतैव किं कर्तव्यं मया ततः ? ॥ १८ ॥
देवतोवाच हे वत्स ! किं बहूक्तेन संप्रति ? ।
एषा ते वल्लभाऽवश्यं न्यायेनैव भविष्यति ॥ २० ॥
तद्वाक्यमनुमेनेऽसौ सा पुनर्गुणसुन्दरी ।
षण्मासीमतिचक्राम पत्युर्विरहदुःखिता ॥ २१ ॥
अप्राप्नुवत्यसौ कान्तं रहस्यं चाविदद्गवती ।
पूर्णेऽवधौ प्रतिज्ञां स्वां संपूरयितुमुद्यता ॥ २२ ॥
सुकाष्ठैः कारयामास चितां तस्मात् पुराद् बहिः ।
[1]चचाल वार्यमाणाऽपि प्रवेष्टुं ज्वलितानले ॥ २३ ॥
बालोऽपि सार्थवाहोऽयं वैराग्येण हि केनचित् ।
मुमूर्षतीत्युदन्तोऽयं सकलेऽपि पुरेऽभवत् ॥ २४ ॥
तमाकर्ण्य ययौ राजा सपौरः सपुरन्दरः ।
रत्नसारपुण्यसारसहितश्च तदन्तिकम् ॥ २५ ॥
राज्ञा [2]सोऽभाणि केनाऽऽज्ञा खण्डिताऽत्र पुरे तव ? ।
यदर्तिलक्षणं काष्ठभक्षणं कुरुते भवान् ॥ २६ ॥
ऊचे च रत्नसारेण सुविचारेण किं तु ते ।
अपराद्धमहो ! दारेरुदारैर्भद्र ! किञ्चन ॥ २७ ॥
सोऽवदद् नापराद्धं मे केनाप्याज्ञा न खण्डिता ।
अहं त्विष्टवियोगार्तिकृता दैवेन खण्डिता ॥ २८ ॥

---

(१) घ चेले च । ङ लोकैश्च वार्यमाणोऽपि ।
(२) ज द साऽभाणि ।

इति[1]जल्पन्त्यसावन्तर्विरहाऽग्निशिखानिभान् ।
सुदीर्घतरनिःश्वासान् [2]मुञ्चत्युपचितं ययौ ॥ २९ ॥
राज्ञोक्तमत्र यः कश्चिद् मित्रमस्य प्रवर्तते ।
संबोध्य रक्षणीयोऽयममुना मृत्युसाहसात् ॥ ३० ॥
नागरैः पुण्यसारोऽस्य तन्मित्रं परिकीर्तितः ।
राज्ञाऽऽदिष्टः स निकटे गत्वाऽथ[3] तमभाषत ॥ ३१ ॥
तारुण्ये वर्तमानस्य संपदाऽलङ्कृतस्य च ।
दुःखहेतुमनाख्याय युक्ता नो मित्र ! ते मृतिः ॥ ३२ ॥
[4]सोऽवदद् यस्य दुःखानि कथ्यन्ते स न दृश्यते ।
हृदयात् कण्ठमागत्य यान्ति तत्रैव तान्यहो ! ॥ ३३ ॥
अपरः प्राह मित्र ! [5]त्वां तथाऽहं तर्कयामि यत् ।
करोष्येवंविधां चेष्टामुपहासकरीं नृणाम् ॥ ३४ ॥
स्मित्वा तल्लिखितश्लोकमुक्ता चैवमुवाच सा ।
किमयं भवता श्लोकोऽलेखि नो वेति कथ्यताम् ? ॥ ३५ ॥
आमेति भणिते तेन सोचे साऽहं तव प्रिया ।
या मुक्ता तोरणद्वारेऽभिधया गुणसुन्दरी ॥ ३६ ॥
प्रयासोऽयं मया चक्रे हे कान्त ! तव हेतवे ।
तत् प्रसीद स्त्रियो वेषं ममाऽऽशु त्वं समर्पय ॥ ३७ ॥
गृहादानाय्य तेनाऽपि दत्तः सोऽस्यै मनोहरः ।
प्रतिसीरान्तरात् साऽथ निर्ययौ परिधाय [6]तम् ॥ ३८ ॥

---

(१) ख घ जल्पन्नसौ । (३) घ ज गत्वा च । (५) घ त्वं ।
(२) ख घ मुञ्चत्युप- । (४) ज द साऽवदत् । (६) ङ च ।

वधूर्वो [1]वन्दत इति भर्त्रा निर्दिश्यमानया ।
नमश्चक्रेऽनया राजा श्वश्रूश्वशुरकौ तथा ॥ ३९ ॥
किमेतदिति पृष्टश्च पुण्यसारः कथां निजाम् ।
कथयामास भूपस्यातिविस्मयविधायिनीम् ॥ ४० ॥
विन्ध्यो रत्नसारेण राजैवं येन [2]मे सुता ।
उदूढा सोऽभवद् नारी तदस्या देव ! का गतिः ? ॥ ४१ ॥
सोऽवादीदत्र प्रष्टव्यं किमु भोः साऽपि गेहिनी ? ।
भवतात् पुण्यसारस्योदूढा तत्प्रियया यतः ॥ ४२ ॥
सा रत्नसुन्दरी ताश्च वल्लभा वलभीपुरात् ।
आययुः पुण्यसारस्य मन्दिरे पुण्ययोगतः ॥ ४३ ॥
एवमष्टौ कलत्राणि[3] कृतचित्राणि शृण्वताम् ।
पूर्वं विहितपुण्यस्य पुण्यसारस्य जज्ञिरे ॥ ४४ ॥
धर्मदेशनया भव्यप्राणिनः प्रतिबोधयन् ।
ज्ञानसाराभिधाऽऽचार्यस्तत्रान्येद्युः समाययौ ॥ ४५ ॥
अथ तद्वन्दनाहेतोर्भक्तिभावितमानसः ।
ययौ पुरन्दरः श्रेष्ठी पुण्यसारसमन्वितः ॥ ४६ ॥
[4]सोऽथ नत्वा तमाचार्यं पप्रच्छेति कृताञ्जलिः ।
प्रभो ! मत्सूनुना पूर्वभवे किं सुकृतं कृतम् ? ॥ ४७ ॥
शशंस सोऽवधिज्ञानी पुरे नीतिपुराभिधे ।
बभूव कश्चिदुच्छिन्नसन्तानः कुलपुत्रकः ॥ ४८ ॥

---

(१) द विन्दत इति ।
(२) घ ज ट मत्सुता ।
(३) ङ कलत्राणां ।
(४) इ असौ ।

संसारवासनिर्विण्णः सुधर्ममुनिसन्निधौ ।
जग्राह स सुधीर्दीक्षां शिक्षां च द्विविधामपि ॥ ४८ ॥
स पञ्च समितीः सम्यक् पालयामास यत्नतः ।
गुप्तीश्चापालयत् कायगुप्तौ किं तु न निश्चलः ॥ ५० ॥
[1]कायोत्सर्गे स्थितो दंशमशकोपद्रवे सति ।
पारयामास तं शीघ्रमसंपूर्णेऽवधावपि ॥ ५१ ॥
सुधर्मसाधुनाऽभाणि किमावश्यकखण्डनम् ? ।
[2]प्रकरोषि यतो दोषो व्रतभङ्गे भवेद् महान् ॥ ५२ ॥
ततस्त्वद्भयभीतोऽसावसहिष्णुरिमामपि ।
गुप्तिं निर्वाहयामास वैयावृत्त्यं चकार च ॥ ५३ ॥
मृत्वा समाधिना सोऽन्ते[3] सौधर्मे त्रिदशोऽभवत् ।
जज्ञे तव सुतः श्रेष्ठिन् ! ततः च्युत्वाऽऽयुषः क्षये ॥ ५४ ॥
सम्म प्रवचनमातॄर्यत् सुखेनैव पालिताः ।
तदनेन प्रियाः सप्त परिणीताः सुखेन हि ॥ ५५ ॥
कष्टेन पालितैका यत् प्रियाऽप्येवमभूत् ततः ।
अप्रमादो विधातव्यो धर्मकर्मणि सर्वथा ॥ ५६ ॥
तच्छ्रुत्वा जातसंवेगोऽग्रहीद् दीक्षां [4]पुरन्दरः ।
जग्राह श्रावकत्वं च पुण्यसारो विवेकवान् ॥ ५७ ॥

---

(१) घ ङः कायोत्सर्गस्थितो । (३) ङः सोऽपि ।
(२) द भोः । (४) ङ, च श्रेष्ठ्यपि ।

ततः पुत्रेषु जातेषु पुण्यसारोऽपि वार्द्धके ।
प्रतिपद्य परिव्रज्यां मृत्वा सुगतिभागभूत् ॥ ५८ ॥

॥ इति पुण्यसारकथानकं समाप्तम् ॥

श्रुत्वेमां पुण्यसारस्य सत्कथां [1]विमलाऽऽशयः ।
जग्राह दीक्षां कनकशक्तिस्त्यक्त्वा नृपश्रियम् ॥ ५९ ॥
समीपे विमलमत्या आर्यायास्ते च तत्प्रिये ।
दीक्षां गृहीत्वा संजाते सुतपःसंयमोद्यते ॥ ६० ॥
[2]विहरन् नगनगरे सिद्धिपर्वतनामके ।
गत्वा शिलोच्चये तस्थौ प्रतिमामेकरात्रिकीम् ॥ ६१ ॥
तत्पूर्वमत्सरी तत्र हिमचूलाभिधः सुरः ।
तस्योपसर्गान् विदधे निराचक्रे स खेचरैः ॥ ६२ ॥
प्रभाते पारयित्वा तां स आगाद् रत्नसञ्चयाम् ।
तत्र सूरि[3]निपाताख्योद्याने तां प्रतिमां व्यधात् ॥ ६३ ॥
शुक्लध्यानजुषः तस्य घातिकर्मचतुष्टये ।
प्रक्षीणे केवलज्ञानमुत्पेदे विश्वदीपकम् ॥ ६४ ॥
विदधे महिमा तस्य देवविद्याधराऽसुरैः ।
वज्रायुधचक्रिणा च मानवैरपरैरपि ॥ ६५ ॥
आगत्य समवासार्षीत् पुरि तस्यामथाऽन्यदा ।
पूर्वोत्तरदिग्विभागे क्षेमङ्करजिनेश्वरः ॥ ६६ ॥

---

(१) ख ङ ज विगताऽऽशयः । क्ष ठ विरताशयः ।
(२) ठ नगनगरैः । द विहरन्ननगारोऽसौ सिद्धपर्वतमस्तके ।
(३) ङ -विमानाख्यो- ।

चक्री वर्द्धापितः पुभिस्तदाऽऽगत्य नियोजितैः ।
ततश्च सपरीवारस्तं नन्तुं [1]द्राग् ययावसौ ॥ ६७ ॥
प्रदक्षिणात्रयपूर्वं प्रणम्य परमेश्वरम् ।
निषसाद यथास्थानं शुश्रूषुर्धर्मदेशनाम् ॥ ६८ ॥
अत्रान्तरे सुतस्तस्य सहस्रायुधनामकः ।
नमस्कृत्य जिनेन्द्रं तं पप्रच्छैवं कृताञ्जलिः ॥ ६९ ॥
भगवन् ! पवनवेगादीनां पूर्वापरे भवाः ।
कथं तातेन विज्ञाता ममैतत् कौतुकं महत् ? ॥ ७० ॥
भगवानप्यथाऽवादीदवधिज्ञानचक्षुषा ।
भवस्वरूपं विज्ञातं तेषां वज्रायुधेन भोः ! ॥ ७१ ॥
पुनः पप्रच्छ [2]तद् ज्ञानं कतिभेदं भवत्यदः ।
जिनोऽवोचत् पञ्चधा तत् प्रसिद्धं ह्यस्मदागमे ॥ ७२ ॥
मतिश्रुतावधिसंज्ञं तत्र ज्ञानत्रयं भवेत् ।
तुर्यं मनःपर्यवं च पञ्चमं केवलाऽभिधम् ॥ ७३ ॥
बुद्धिः स्मृतिश्च प्रज्ञा च मतिः पर्यायवाचकाः ।
धीमद्भिः पुनरेतासां पृथक् भेदाः प्रकीर्तिताः ॥ ७४ ॥
भविष्यत्कालविषया मतिस्तावत् प्रकीर्तिता ।
बुद्धिश्च वर्तमाने स्यादतीते च स्मृतिर्भवेद् ॥ ७५ ॥
कालत्रये च विज्ञेया प्रज्ञा सा च चतुर्विधा ।
[3]क्षयं गतैर्भवे जन्तोर्मत्यावरणकर्मभिः ॥ ७६ ॥

---

(१) घ ठ द -प्रयथाव- । (२) ङ स ।
(३) द क्षयं गते भवेद् जन्तोर्मत्यावरणकर्मणि ।

औत्पत्तिकी वैनयिकी[1] कार्मिकी पारिणामिकी ।
चतुर्विधा भवेद् बुद्धिः पञ्चमी नोपलभ्यते ॥ ७७ ॥
अदृष्टाश्रुतपूर्वं या वस्तुन्युत्पद्यते [2]क्षणात् ।
बुद्धिरौत्पत्तिकी नाम सा बुधैः परिकीर्तिता ॥ ७८ ॥
भारते रोहको नाम शिलाप्रभृतिवस्तुषु ।
दृष्टो निदर्शनं तस्यां तत्कथा श्रूयता[3]मिति ॥ ७९ ॥
उज्जयिन्यां महापुर्यामरिकेसरिनामकः ।
बुद्धिविक्रमसंपन्नो बभूव पृथिवीपतिः ॥ ८० ॥
तस्याः पुर्याः समासन्ने महत्या शिलयाऽङ्किते ।
नटग्रामेऽभवद् रङ्गशूरो नाम्ना कुशीलवः ॥ ८१ ॥
अतिमात्रकलापात्रं बुद्धिनिर्जितवाक्पतिः ।
बालोऽप्यबालभावोऽभूत् तत्पुत्रो रोहकाह्वयः ॥ ८२ ॥
तन्मातरि विपन्नायां रङ्गशूरस्य तस्य तु ।
बभूव रुक्मिणी नाम्नी प्रेयसी रूपशालिनी ॥ ८३ ॥
सा यौवनमदोन्मत्ता भर्तृगौरवगर्विता ।
रोहकस्याङ्गसंस्कारं न चकार तथाविधम् ॥ ८४ ॥
सोऽवदद् कुपितो यत् त्वं शुश्रूषां न करोषि मे ।
भविष्यति ततोऽवश्यं हे मातः ! ते न सुन्दरम् ॥ ८५ ॥

---

(१) ङ कार्मिका परिणामिका ।
(२) ख घ ङ ज मतिः ।
(३) क ज ट ढ -मियम् ।

साऽब्रवीद् रे शिशो ! यत् त्वं निग्रहानुग्रहाक्षमः ।
स त्वं रुष्टोऽथवा तुष्टः करिष्यसि ममात्र किम् ? ॥ ८६ ॥
रोहकः चिन्तयामासोत्पाद्य मन्तुं कमप्यहम् ।
तथा करिष्ये तातस्यानिष्टेयं जायते यथा ॥ ८७ ॥
विचिन्त्येवं स यामिन्यामुत्थाय सहसाऽब्रवीत् ।
यात्येष पुरुषः कोऽपि निःसृत्य गृहमध्यतः ॥ ८८ ॥
तद् निशम्य पिता तस्य शयानोऽथ गृहाजिरे ।
उत्थायोवाच रे ! दुष्टं तं दर्शय नरं मम ॥ ८९ ॥
रोहकोऽप्यवदत् तात ! स उत्प्लुत्य गतः क्षणात् ।
रङ्गोऽपि हि विरागार्हस्ततोऽभूद् गेहिनीं प्रति ॥ ९० ॥
आः ! किमन्यनराऽऽसक्ता जातेयमथवा भवेत् ? ।
किमिदं दुर्घटं येन भवन्त्येवंविधाः स्त्रियः ? ॥ ९१ ॥
पृथक्शय्याविधानेन ततोऽसौ तेन धीमता ।
अशस्त्रवधवद् दुःखभागिनी विदधे स्फुटम् ॥ ९२ ॥
साऽपि दध्यौ मया नापराद्धं किमपि भर्तरि ? ।
नूनमेतेन बालेन कोपितोऽयं पतिर्मम ॥ ९३ ॥
करोम्यस्यैव तद्भक्तिं भर्तृतोषविधित्सया ।
येनैवाऽऽरोपितं दुःखं स एवा'पनयत्वरम् ॥ ९४ ॥
ततः सा प्रार्थयामास रोहकं भक्तिपूर्वकम् ।
वत्स ! मेऽभिमुखं कान्तं कुरु दास्यस्मि ते स्फुटम् ॥ ९५ ॥

---

(१) ख घ ङः -पनयेत्तराम् ।

विधाय स सुधीरेवं तामात्मवशवर्तिनीम् ।
पुना रात्रौ सचन्द्रायां प्रोवाच जनकं प्रति ॥ ९६ ॥
उत्तिष्ठोत्तिष्ठ हे तात ! यात्यद्याप्यसकौ नरः ।
अथास्य पृच्छतोऽदर्शि तेन च्छाया शरीरजा ॥ ९७ ॥
त्वच्छायेयमिति प्रोक्ते पित्रा प्रोवाच रोहकः ।
अग्रेऽप्येवंविधौ दृष्टस्तर्हि तात ! मया नरः ॥ ९८ ॥
रङ्गशूरः ततो दध्यौ हा ! मया वचनात् शिशोः ।
अपमानपदं चक्रे पत्नी दोषाऽभिशङ्कया ॥ ९९ ॥
ततः सा रुक्मिणी भर्तुः पूर्ववद् वल्लभाऽभवत् ।
रोहकस्य सदा भक्तिं कुरुते स्म च सादरम् ॥ ७०० ॥
स पित्रा सह भुङ्क्ते स्म तथाऽपि कुशलाऽऽशयः ।
स्वजनन्या अपि प्रायो बुद्धिमान् न हि विश्वसेत् ॥ १ ॥
अन्यदा सह तातेन स गत्वोज्जयिनीं पुरीम् ।
सर्वमालोकयामास पुरे देवकुलाऽऽदिकम् ॥ २ ॥
गते तातेपुरीमध्ये स सिप्रासैकतेऽन्यदा ।
पुरीं रेणुमयीं कृत्वा तस्थौ तद्रक्षणे स्वयम् ॥ ३ ॥
अथाल्पभृत्योऽश्वाऽऽरूढस्तेनागच्छन् पथा नृपः ।
सहसा रोहकेणोचे सावष्टम्भमिदं वचः ॥ ४ ॥
पुरः प्रासादचैत्याद्यां राजपुत्र ! पुरीमिमाम् ।
किं त्वं भङ्क्तासि येनाश्वं निवर्तयसि नान्यतः ? ॥ ५ ॥
तस्य बुद्ध्या गिरा चैव प्रहृष्टः पृथिवीपतिः ।
कस्यायं सूनुरित्येवं पप्रच्छानुचरान् निजान् ? ॥ ६ ॥

तैरुचे रङ्गशूरस्य सुतोऽयं देव ! रोहकः ।
विज्ञानवचनाभ्यां यो जातस्वचित्तमोहकः ॥ ७ ॥
मन्त्रिपञ्चशतान्यासन् तस्य राज्ञः परं नरम् ।
प्रकृष्टं मार्गयामास स विधातुं महत्तमम् ॥ ८ ॥
ततोऽसौ रोहकप्रज्ञापरीक्षणकृतेऽन्यदा ।
पुरुषं प्रेषयित्वा स्वं ग्रामीणानिदमादिशत् ॥ ९ ॥
अस्मद्योग्य इह ग्रामे प्रासादः कार्यतां परम् ।
द्रव्यव्ययेन बहुनाऽप्येकद्रव्यविनिर्मितः ॥ १० ॥
संभूय ग्रामवृद्धास्ते रङ्गशूरनटश्च सः ।
चिरमालोचयामासुस्तद् विधातुमनीश्वराः ॥ ११ ॥
विना तातमभुञ्जानो रोहकोऽथ रुदन् गृहात् ।
आगत्याकारयामास भोजनायैनमादरात् ॥ १२ ॥
सोऽवदद् वत्स ! दत्तोऽद्य क्षुद्राऽऽदेशो महीभुजा ।
एकद्रव्येण केनापि प्रासादः कार्यतामिति ॥ १३ ॥
तन्निर्णयमकृत्वैव भोजनं क्रियते कथम् ? ।
आज्ञा बलवतां यस्माद् लङ्घिता न शुभावहा ॥ १४ ॥
रोहकोऽप्यवदत् तावद् भोजनं क्रियतां ननु ।
पश्चात् सर्वं भणिष्यामि चिन्तनीयं किमत्र भोः ? ॥ १५ ॥
भोजनोर्द्धमभाषिष्ट स सुधी राजपूरुषम् ।
इयमुच्चतरा दीर्घाऽऽयामयुक्ताऽस्ति या शिला ॥ १६ ॥
तयैव कारयिष्यामः प्रासादं नृपचिन्तितम् ।
पूरणीयं नृपेणैव पुनः शिल्पिधनाऽऽदिकम् ॥ १७ ॥

इत्यर्थे कथिते तेन पुना राज्ञा परेद्यवि: ।
ग्रामस्था इत्यभाषन्त वस्तमुद्दिश्य पुंगिरा ॥ १८ ॥
पोषणीय: प्रतिदिनं वस्तोऽसौ चारिवारिभि: ।
अहीनाधिकमेदास्तु पुन: प्रेष्योऽस्मदन्तिकम् ॥ १९ ॥
कथितं रोहकस्यैव ततस्तेनापि धीमता ।
तृणाऽऽदिपोषितस्यास्य दर्श्यते प्रत्यहं वृक: ॥ २० ॥
तथाकृतेऽमुना राज्ञा प्रेषित: कुक्कुटोऽन्यदा ।
एकोऽपि योधनीयोऽयं दत्ताऽऽज्ञा चेटशी तथा ॥ २१ ॥
संक्रान्तप्रतिबिम्बोऽसावादर्शे योधित[1]श्चिरम् ।
तिलानां शकटान् प्रेष्य भाणितं भूभुजा पुन: ॥ २२ ॥
यन्त्रे हि पीडयित्वाऽमून् तैलं कार्यं परं तिला: ।
मीयन्ते येन मानेन मेयं तेनैव तैलकम् ॥ २३ ॥
रोहको मापयामास पृथ्वादर्शतलेन तान् ।
भूयस्तेनैव तैलं च बुद्धे: किं नाम दुष्करम् ? ॥ २४ ॥
अन्यदाऽकारयद् वर्तिं नृपतिर्वालुकामयीम् ।
अनया गोपयिष्यन्ते शालीनां किल तन्दुला: ॥ २५ ॥
रोहकोऽप्यवदद् राजकार्यं कार्यं यथातथम् ।
परं प्रमाणं नैतस्या जानीमोऽकृतपूर्विण: ॥ २६ ॥
ततस्तस्या: पुरातन्या: खण्डमेकं प्रदर्श्यताम् ।
यतस्तेन प्रमाणेन सा नव्या क्रियते बहु: ॥ २७ ॥

---

(१) ख घ ज -तः स्वयम् ।

अन्यदा च जरद्वस्ती प्रेषितस्तत्र भूभुजा ।
कथितं च यथा यत्नात् पाल्योऽयं मम वारणः ॥ २८ ॥
संस्थितस्यास्य मे वार्ता कथनीया यथा तथा ।
मृत इत्यक्षरद्वन्द्वं नोच्चार्यं तु पुरो मम ॥ २९ ॥
ज्ञापितो रोहकेणेति मृते तस्मिन् महीपतिः ।
यद् देव ! न चरत्यद्य करी पिबति वा न च ॥ ३० ॥
चक्रे नोच्छ्वासनिःश्वासौ राज्ञोचे तर्हि किं मृतः ? ।
सोऽवदद् वेद्मि नैवाहं देवो जानाति कारणम् ॥ ३१ ॥
राज्ञा पुनः समादिष्टं ग्रामलोकस्य तस्य तु ।
यद् भोः ! स्वादुजलाऽऽपूर्णः स्वकूपः प्रेष्यतामिह[1] ॥ ३२ ॥
प्रत्यूचे रोहकोऽप्येवं पुरस्था काऽपि कूपिका ।
देवाऽऽदौ प्रेष्यतामत्र यतः सार्द्धं तयैष्यति ॥ ३३ ॥
हृष्टो राजाऽप्यभाषिष्ट युक्तमेतेन जल्पितम् ।
कार्यस्याऽघटमानस्याऽघटमानमिहोत्तरम् ॥ ३४ ॥
प्रदत्ताऽऽज्ञा पुना राज्ञा यदुदीच्यां वनं दिशि ।
दक्षिणस्यां दिशि ग्रामात् तत् कथं क्रियते वद ? ॥ ३५ ॥
रोहकोऽप्यवदद् ग्रामनिवेशः क्रियतेऽन्यतः ।
तेनैव विधिना ग्रामाद् भवेद् दक्षिणतो वनम् ॥ ३६ ॥
राजाऽऽदेशात् स चान्येद्युः पायसं पावकं विना ।
पपाचावकरस्यान्तः स्थालीं विन्यस्य यत्नतः ॥ ३७ ॥

---

(१) ख घ -मिति । ज -मितः ।

समीपे भूपतिः स्वस्याकारयामास रोहकम् ।
व्यवस्थयाऽनयाऽन्येद्युरन्योऽन्यस्य विरुद्धया ॥ ३८ ॥
नागम्यं मलिनाङ्गेन कार्यं स्नानं न च त्वया ।
यानाऽऽरूढेन चागम्यं पद्भ्यां नाऽस्पृश्यता भुवम् ॥ ३९ ॥
नोत्पथेन न मार्गेण न रात्रौ न च वासरे ।
न कृष्णे नोज्ज्वले पक्षे न च्छायायां न चाऽऽतपे ॥ ४० ॥
नोपदापाणिना नैव रिक्तहस्तेन वा त्वया ।
आगन्तव्यं त्वयाऽभ्यासे शेमुषीशालिना ध्रुवम् ॥ ४१ ॥
ततश्चैडकिकाऽऽरूढः स्पृशन् पद्भ्यां धरातलम् ।
प्रक्षालिताङ्गस्तोयेन सन्ध्याकाले कुहूदिने ॥ ४२ ॥
धृतचालनकः शीर्षे चक्ररेखान्तरालगः ।
मृदुपायन[1]पाणिश्च स ययौ नृपपर्षदि ॥ ४३ ॥
कृत्वा प्रणामं भूपस्य समीपे निषसाद च ।
ढौकयामास चामुष्य प्राभृतं मृत्तिकामयम् ॥ ४४ ॥
किमेतदिति राज्ञोक्ते कथयित्वाऽऽत्मनः कथाम् ? ।
सोऽवदद् देव ! गुर्वीयं जगन्मातेव मृत्तिका ॥ ४५ ॥
ततश्च स्वाऽऽगतप्रश्नद्रव्यदानाऽऽदिना नृपः ।
संमान्यैनं सभामध्ये प्रशशंस सविस्मयः ॥ ४६ ॥
अहो ! अस्य महापुंसो विलोक्य मतिवैभवम् ।
वयं मन्यामहे रूढं सत्यमेतत् सुभाषितम् ॥ ४७ ॥

---

(१) ख घ ज -पाणिभ्यां ।

वाजिवारणलोहानां काष्ठपाषाणवाससाम् ।
नारीपुरुषतोया[1]नामन्तरं महदन्तरम् ॥ ४८ ॥
अथाऽङ्गरक्षकल्पे तं निवेश्य निशि भूपतिः ।
सुष्वाप शयने तस्मिन् रोहकोऽपि महामतिः ॥ ४९ ॥
यामिन्याः प्रथमे यामे जातनिद्राव्ययोऽथ सः ।
विबोध्य रोहकं स्माऽऽह सुप्तो जागर्ति वा भवान् ? ॥ ५० ॥
सोऽवदद् नैव सुप्तोऽस्मि देव ! चिन्तां करोम्यहम् ।
अविकालिङ्किकाः को नु करोत्येवंविधा इति ? ॥ ५१ ॥
भूपपृष्टेन तेनैव कृतस्तन्निर्णयो यथा ।
वातप्राबल्यतस्तासां जायन्ते तास्तथाविधाः ॥ ५२ ॥
द्वितीयप्रहरेऽप्येवं पृष्टो राज्ञा जजल्प सः ।
यथा पिप्पल[2]पर्णानामादिरन्तोऽथवा गुरुः ॥ ५३ ॥
तेनैव निर्णयश्चक्रे द्वावप्येतौ समाविति ।
तृतीयप्रहरे खाडिहलादेहस्य चिन्तनम् ॥ ५४ ॥
[3]निर्णीतमिति तेनैव समत्वं देहपुच्छयोः ।
यावती श्वेतता तावत् कृष्णत्वमपि तत्तनौ ॥ ५५ ॥
चतुर्थप्रहरे विद्वः कण्टकेन महीभुजा ।
जगाद रोहको देव ! चिन्ता त्वत्तातजा मम ॥ ५६ ॥

---

(१) ठ -नां दृश्यते ।
(२) ख घ न पत्राणां ।
(३) ङ निर्णीय कृतं ।

कीदृशीति नृपेणोक्ते सोऽवदद् राजगुह्यकौ ? ।
निर्णेजकालिमातङ्गाश्चेति ते जनकाः स्फुटम् ॥ ५७ ॥
राजोचे किमसंबद्धं ब्रूषे जानासि वा कथम् ? ।
सोऽप्यवोचत जानामि भूपते ! तव चेष्टया ॥ ५८ ॥
न्यायेन पालयस्युर्वीं येन तेन नृपाऽऽत्मजः ।
तुष्टो ददासि यद् भूरि धनं तद् धनदात्मजः ॥ ५९ ॥
कोपं करोषि यद् गाढं तत् त्वं चण्डालनन्दनः ।
रुष्टो हरसि सर्वस्वं येन तद् रजकाऽऽत्मजः ॥ ६० ॥
विद्धः कण्टिकया यस्माद् दूनोऽहमलिदंशवत् ।
तेन जानाम्यहं राजन् ! वृश्चिकोऽपि पिता तव ॥ ६१ ॥
इत्यर्थे संशयश्चेत्ते जननीं पृच्छ तन्निजाम् ।
तयाऽप्यनुमतं ह्येतदतिनिर्बन्धपृष्टया ॥ ६२ ॥
वीक्ष्याभिलषिता एते यद्दृतुस्नातया मया ।
तेन पञ्चाप्यमी वत्स ! पितृभावं भजन्ति ते ॥ ६३ ॥
ततोऽसौ रोहको नामाऽनन्यसामान्यधीधनः ।
पञ्चमन्त्रिशतस्वामी कृतसन्तुष्टेन भूभुजा ॥ ६४ ॥
तस्य बुद्धिप्रभावेण दृप्ता अपि महीभुजः ।
अरिकेसरिभूपस्य बभूवुर्वशवर्तिनः ॥ ६५ ॥

॥ इति रोहककथानकं समाप्तम् ॥

बुद्धिर्विनयिकी सा या विनयेन भवेद् गुरोः ।
अधीतेऽपि निमित्ताऽऽदिशास्त्रे चारुविचारकृत् ॥ ६६ ॥

घटचित्राऽऽदिकरणशिल्पिनां लेखकस्य च ।
भवेत् कर्मसमुत्था या सा बुद्धिः कार्मिकी स्फुटम् ॥ ६७ ॥
परिणामवशात् सर्ववस्तुनः कृतनिश्चया ।
स्यात् पारिणामिकी बुद्धिः प्रतिबोधविधायिनी ॥ ६८ ॥
सर्वासामपि बुद्धीनां दृष्टान्ता आगमोदिताः ।
अनेके सन्ति ते ग्रन्थगौरवादिह नोदिताः ॥ ६९ ॥
बुद्धिश्चतुर्विधाऽप्येषा मतिज्ञानमिहोच्यते ।
सति यस्मिन् श्रुतमपि प्रादुर्भवति देहिनाम् ॥ ७० ॥
त्रिकालविषयं वस्तु येनाऽधीतेन विद्यते ।
तत् सिद्धमातृकामुख्यं श्रुतज्ञानं प्रकीर्तितम् ॥ ७१ ॥
कियन्तोऽपि भवा येन विज्ञायन्ते शरीरिणाम् ।
प्रोक्तं तदवधिज्ञानं सर्वदिक्षु कृतावधि ॥ ७२ ॥
भावा मनोगता येन ज्ञायन्ते संज्ञिदेहिनाम् ।
मनःपर्यवसंज्ञं तच्चतुर्थं ज्ञानमुच्यते ॥ ७३ ॥
सर्वत्र सर्वदा यस्य स्खलना न कथञ्चन ।
तद्भवे केवलज्ञानं पञ्चमं सिद्धिसौख्यकृत् ॥ ७४ ॥
अथोत्थाय जिनं नत्वा गृहे गत्वा च चक्रभृत् ।
राज्ये न्यवेशयत् पुत्रं [1]स सहस्राऽऽयुधाभिधम् ॥ ७५ ॥
चतुःसहस्रैः राज्ञीनां तत्संख्यैः पार्थिवैस्तथा ।
सप्तपुत्रशतैः सार्द्धं स श्रामण्यं ततोऽग्रहीत् ॥ ७६ ॥

---

(१) ङ सहस्रायुधनामकम् ।

गृहीत्वा द्विविधां शिक्षां गीतार्थो विहरन् भुवि ।
ययौ सोऽपि गिरिवरं सिद्धिपर्वतसंज्ञकम् ॥ ७७ ॥
तत्र वैरोचने स्तम्भे रमणीये शिलातले ।
स सांवत्सरिकीं तस्थौ प्रतिमां मेरुनिश्चलः ॥ ७८ ॥
इतोऽश्वग्रीवतनयौ मणिकुम्भमणिध्वजौ ।
भवं भ्रान्त्वा सुरत्वेन समुत्पन्नौ तदा हि तौ ॥ ७९ ॥
तत्प्रदेशं समायातौ भगवन्तं निरीक्ष्य तम् ।
उत्पन्नमत्सरौ तस्योपसर्गानिति चक्रतुः ॥ ८० ॥
तीक्ष्णदंष्ट्राकरालास्यं दीर्घलाङ्गूलमादितः ।
तौ सिंहव्याघ्रयो रूपं मुक्तनादं वितेनतुः ॥ ८१ ॥
ततश्च रूपमास्थाय करेणोरतिभीषणम् ।
क्रुद्धौ विदधतुः तस्य दन्तघाताऽऽद्युपद्रवम् ॥ ८२ ॥
भूत्वाऽथ सर्पसर्पिण्यौ फटाटोपभयङ्करौ ।
ततः पिशाचराक्षस्यावुपदुद्रुवतुश्च तम् ॥ ८३ ॥
रम्भातिलोत्तमानाम्न्यौ शक्रस्याग्रप्रिये तदा ।
वज्रायुधमुनीन्द्रं तं नमस्कर्तुमुपेयतुः ॥ ८४ ॥
ते विलोक्य समायान्त्यौ [1]त्वरितं तौ प्रणेशतुः ।
ताभ्यां संतर्जितौ गाढं वचनैर्भयकारिभिः ॥ ८५ ॥
साङ्गहारं सविलासं हावभावरसोत्तरम् ।
रम्भा नृत्यं स्वयं चक्रे वज्रायुधमुनेः पुरः ॥ ८६ ॥

---

(१) क ज विरतौ तौ प्रणेमतुः । च द वारितौ ।

सप्तस्वरसमायुक्तं ग्रामत्रयपवित्रितम् ।
तिलोत्तमाऽपि सपरीवारा गीतं व्यधाद् वरम् ॥ ८७ ॥
विधायैवंविधां भक्तिं मुनीन्द्रं तं प्रणम्य च ।
रम्भातिलोत्तमे देव्यौ जग्मतुः स्थानमात्मनः ॥ ८८ ॥
वार्षिकीं पारयित्वा तां प्रतिमामतिदुष्कराम् ।
विजहार महीपीठे वज्रायुधमहामुनिः ॥ ८९ ॥
क्षेमङ्करे गते मोक्षं गणभृत् पिहितास्रवः ।
आययौ नगरेऽन्येद्युः सहस्रायुधभूपतिः ॥ ९० ॥
धर्मं तदन्तिके श्रुत्वा प्रतिबुद्धः सकोऽपि हि ।
राज्ये शतबलं पुत्रं निवेश्य व्रतमाददे ॥ ९१ ॥
गीतार्थौ मिलितः सोऽथ तातसाधोस्तताश्च तौ ।
भूम्यां विहरतः क्षोभौ कुर्वन्तौ विविधं तपः ॥ ९२ ॥
ईषत् प्राग्भारसंज्ञेऽथ समारुह्य महीधरे ।
संतस्थतुः कृतप्रायौ पादपोपगमेन तौ ॥ ९३ ॥
त्यक्त्वा देहमिदं मलाञ्चितमुभौ तौ देवलोकोत्तरं
संप्राप्तौ नवमं गतावसुमथ ग्रैवेयकाग्रेयकम् ।
इत्थं शान्तिजिनेश्वरस्य चरिते तस्यैव वर्याष्टमः
प्रोक्तोऽयं मयका भवः सनवमः सङ्घस्य कुर्याच्छिवम् ॥७९४॥

इत्याचार्यश्रीअजितप्रभसूरिविरचिते श्रीशान्तिनाथचरिते
अष्टमनवमभववर्णनो नाम चतुर्थः प्रस्तावः ॥

---

# अथ पञ्चमः प्रस्तावः ।

इतोऽस्य जम्बूद्वीपस्य प्राग्विदेहस्य [1]मध्यगे ।
विजये पुष्कलावत्यामस्ति पूः पुण्डरीकिणी ॥ १ ॥
नीतिकीर्तिजयश्रीणां स्त्रीणां सङ्केतमन्दिरम् ।
अभूत् तीर्थङ्करस्तत्र राजा घनरथाभिधः ॥ २ ॥
रूपलावण्यसंयुक्ते तस्याऽभूतामुभे प्रिये ।
आद्या प्रीतिमतीनाम्नी द्वितीया च मनोहरी ॥ ३ ॥
वज्रायुधस्य जीवोऽथैकत्रिंशत्सागरस्थितेः ।
तस्मात् सर्वोत्तमग्रैवेयकादायुःक्षये च्युतः ॥ ४ ॥
तत्पूर्वप्रेयसीकुक्षिशुक्तौ मुक्तामणिप्रभः ।
समुत्पेदे सुतत्वेन मेघस्वप्नोपसूचितः ॥ ५ ॥ ( युग्मम् )
सहस्रायुधजीवोऽथ ततश्चयुत्वोदरेऽभवत् ।
राज्ञः पद्मायाः द्वितीयस्याः सुरथस्वप्नशंसितः ॥ ६ ॥
पूर्णकालेऽथ ते देव्यौ प्रसूते शुभलक्षणौ ।
मेघरथदृढरथनामानौ वरनन्दनौ ॥ ७ ॥
अतिक्रान्तशिशुत्वौ तौ कलाचार्यस्य सन्निधौ ।
सुविनीतौ महाप्राज्ञौ पेठतुः सकलाः इति ॥ ८ ॥

---

(१) ख घ ज भूषणे ।

लेख्यं गणितमालेख्यं नाट्यं गीतं च वादितम् ।
स्वरपुष्करगतं समतालं चेति तत् त्रिधा ॥ ९ ॥
अष्टापदं नालिका च जनवादं तथैव च ।
त्रिधा द्यूतं चान्नपानविधिः शयनसंयुतः ॥ १० ॥
आभरणविधिश्चाऽऽर्या गाथा गीतिः प्रहेलिका ।
श्लोकश्च गन्धयुक्तश्च तरुणीनां प्रसाधनम् ॥ ११ ॥
नगरस्त्रीहयहस्तीनां लक्षणानि गवां तथा ।
लक्षणं ताम्रचूडस्य तथा [1]मेढ्रस्य लक्षणम् ॥ १२ ॥
चक्रच्छत्रमणिदण्डकाकिणीखड्गचर्मणाम् ।
प्रत्येकं लक्षणानीह ज्ञातव्यानि कलाविदा ॥ १३ ॥
चन्द्रसूरग्रहराहुचरितं सूपकारता ।
विद्याकारो मन्त्रगतं रहस्यगतमेव च ॥ १४ ॥
व्यूहं चापि प्रतिव्यूहं चारं च प्रतिचारकम् ।
स्कन्धावारप्रमाणं च मानं च पुरवास्तुनोः ॥ १५ ॥
स्कन्धावारपुरवास्तुनिवेशं चाऽश्वशिक्षणम् ।
हस्तिशिक्षा तत्त्ववादं नीतिशास्त्रं सविस्तरम् ॥ १६ ॥
धनुर्वेदमणिस्वर्णधातुवादं तथैव च ।
बाहुयुद्धं दण्डयुद्धं दृष्टिमुष्ट्योर्युधं तथा ॥ १७ ॥
नियुद्धं वाग्युधं सर्पवक्षापां स्तम्भनं तथा ।
पत्रच्छेद्यं वैद्यकं च क्षुर्विाणिज्यकर्म च ॥ १८ ॥

---

(१) क ख ङ ज षण्ढस्य ।

विज्ञेयो वलिपलितनाशः पश्चिरुतं तथा ।
कला द्विसप्ततिश्चैता विद्वद्भिः परिकीर्तिताः ॥ १८ ॥
कलाकलापसम्पूर्णौ रूपनिर्जितमन्मथौ ।
क्रमेण यौवनं प्राप्तौ कुमारौ तौ बभूवतुः ॥ २० ॥
सुमन्दिरपुराधीशनिहतारिनृपाऽऽत्मजे ।
उपयेमे मेघरथः प्रियमित्रामनोरमे ॥ २१ ॥
तस्यैव भूपतेः पुत्री कनिष्ठा रूपसंयुता ।
पत्नी दृढरथस्यापि जज्ञे सुमतिसंज्ञका ॥ २२ ॥
नन्दिषेणमेघसेनाऽभिधानौ वरनन्दनौ ।
जातौ [1]मेघरथस्याऽथ पत्नीद्वितयसंभवौ ॥ २३ ॥
पुत्रो दृढरथस्यैको रथसेनाभिधोऽभवत् ।
ते त्रयोऽपि कलाऽभ्यासं समये चक्रिरेऽखिलम् ॥ २४ ॥
राजा मेघरथोऽन्येद्युः पुत्रपौत्रसमन्वितः ।
सिंहासननिविष्टोऽधितष्ठावास्थानमण्डपम् ॥ २५ ॥
प्रोक्ता मेघरथेनाथ न वाधीता निजात्मजाः ।
वत्साः ! प्रज्ञाप्रकाशार्थं ब्रूत प्रश्नोत्तराणि च ॥ २६ ॥

ततस्तद्वचनानन्तरमेव एकेन कनिष्ठेन पठितम् :—

कथं संबोध्यते ब्रह्मा दानार्थो धातुरत्र कः ? ।
कः पर्यायश्च योग्यानां को वाऽलङ्करणं नृणाम् ? ॥ २७ ॥

---

(१) ङ मेघरथस्यैतौ विनयादिगुणैर्युतौ ।

विचिन्त्य द्वितीयेनोक्तम्—'कलाऽभ्यासः' इति ।

स च पठितवान् :—

दण्डनीतिः कथं पूर्वं महाखेदे क उच्यते ? ।
काऽबलानां गतिर्लोकपालः कः पञ्चमो मतः ? ॥ २८ ॥

ज्येष्ठेन तस्योत्तरं दत्तम्—"महोपतिरिति" ।

ततश्च स पपाठ :—

किमाशीर्वचनं राज्ञां का शम्भोः तनुमण्डनम् ? ।
कः कर्ता सुखदुःखानां [1]पात्रं च सुकृतस्य कः ? ॥ २९ ॥

अन्येषु अजानत्सु मेघरथेन तस्योत्तरमादायि—'जीवरक्षाविधिरिति' ।

स्वयं च भणितवान्—

सुखदा का शशाङ्कस्य मध्ये च भुवनस्य कः ? ।
निषेधवाचकः को वा का संसारविनाशिनी ? ॥ ३० ॥

राज्ञोक्तम्—'भावनेति' ।

तथैका गणिका तत्रोपविश्य नृपमब्रवीत् ।
जीयते देव ! नान्येन कुक्कवाकुरयं मम ॥ ३१ ॥
यदि वाऽन्यस्य कस्याऽपि गर्वोऽस्ति चरणायुधात् ।
स पादमूले भवतामानयत्वात्कुक्कुटम् ॥ ३२ ॥
जेष्यते कुक्कुटो मे चेत् ताम्रचूडेन कस्यचित् ।
तत् तस्मै संप्रदास्यामि द्रव्यलक्षमहं स्फुटम् ॥ ३३ ॥
राज्ञी मनोरमा तस्याः समाकर्ण्याथ तद्वचः ।
दास्या राजाज्ञया तत्रानाययद् निजकुक्कुटम् ॥ ३४ ॥

---

(१) ठ मूलं च सुकृतस्य कः ।

मुक्तस्तेन पणेनाऽसौ ततस्तौ नृपतेः पुरः ।
योद्धुं प्रवृत्तावन्योऽन्यं चञ्चुघातकृतत्वरौ ॥ ३५ ॥
चञ्चुपादप्रहारैस्तौ युध्यन्तावरुणेक्षणौ ।
राजसभ्यजनकृतां प्रशंसां समवापतुः ॥ ३६ ॥
तीर्थङ्करत्वादागर्भवासाद् ज्ञानत्रयाऽन्वितः ।
अत्रान्तरे मेघरथं राजा घनरथोऽब्रवीत् ॥ ३७ ॥
चिरं युध्वाऽनयोर्मध्याद् वत्स ! नैकोऽपि जेष्यति ।
पृष्टोऽथ कारणं तेन पुनरेव जगाद सः ॥ ३८ ॥
इहैव भरतक्षेत्रेऽभूतां रत्नपुरे पुरे ।
धनदसुदत्तसंज्ञौ वणिजौ मित्रतां गतौ ॥ ३९ ॥
वाहयन्तौ बलीवर्दौ क्षुत्तृष्णाभरपीडितौ ।
व्यवहारं सदा गन्त्र्या चक्रतुः सममेव तौ ॥ ४० ॥
मिथ्यात्वमोहितौ कूटतुलामानविधानतः ।
अर्जयामासतुर्वित्तं तौ चाल्पं परवञ्चकौ ॥ ४१ ॥
अन्यदा कलहायन्तौ तौ प्रहृत्य परस्परम् ।
विपद्य चार्तध्यानेन संजातौ वनदन्तिनौ ॥ ४२ ॥
कूले सुवर्णकूलायाः वर्द्धमानौ बभूवतुः ।
काञ्चनताम्रकलशाऽभिधानौ यूथनायकौ ॥ ४३ ॥
तौ च यूथस्य लोभेन युद्ध्वा मृत्वा बभूवतुः ।
सैरिभौ पुर्ययोध्यायां नन्दिमित्रस्य मन्दिरे ॥ ४४ ॥
गृहीत्वा राजपुत्राभ्यां योधितौ तौ परस्परम् ।
विपद्य पुरि तत्रैव संजातौ मेषकौ दृढौ ॥ ४५ ॥

मिथः शृङ्गाऽग्रघातेन भिन्नशीर्षौ सविस्मयम् ।
मृत्वेमौ कुक्कुटौ जातौ रोषारुणविलोचनौ ॥ ४६ ॥
ततश्च नैतयोर्मध्याद् वत्सैकोऽपि विजेष्यते ।
इति श्रुत्वा मेघरथोऽवधिज्ञानी शशंस च ॥ ४७ ॥
न केवलमिमौ तात ! [1]मत्सरावेष्टितौ दृढम् ।
खेचराधिष्ठितौ चात्र कारणं कथयामि वः ॥ ४८ ॥
अस्त्यत्र भरतक्षेत्रे वैताढ्यवरपर्वते ।
सुवर्णनाभं नगरमुत्तरश्रेणिभूषणम् ॥ ४९ ॥
तत्राऽऽसीद् गरुडवेगाभिधानः खेचरेश्वरः ।
तस्य पुत्री चन्द्रसूरतिलकाऽऽख्यौ नभश्चरौ ॥ ५० ॥
अन्यदा तौ नमस्कर्तुं प्रतिमाः शाश्वतार्हताम् ।
जम्मतुर्मेरुशिखरे जिनस्नात्रपवित्रिते ॥ ५१ ॥
तत्र सागरचन्द्राऽऽख्यं चारणाश्रमणं वरम् ।
दृष्ट्वा प्रणेमतुः स्वर्णशिलाऽऽसीनमिमौ मुदा ॥ ५२ ॥
पृष्टो मुनिवरस्ताभ्यां निजपूर्वभवस्थितिम् ।
सोऽपि ज्ञानेन विज्ञाय कथयामास तावितिं ॥ ५३ ॥
अस्तीह धातकीखण्डद्वीपस्यैरवते पुरम् ।
नाम्ना वज्रपुरं तत्राभयघोषोऽभवद् नृपः ॥ ५४ ॥
सुवर्णतिलका तस्य राज्ञी तत्कुक्षिसम्भवौ ।
अभूतां जयविजयाभिधानौ वरनन्दनौ ॥ ५५ ॥

---

(१) क युद्धेरते वैरसंयुतौ । खेचरावेष्टितौ । ख घ ङ मत्सरावेष्टितौ युतौ । युद्धेरते रोषरणौ । ठ पूर्वदुष्कर्मवैरिणौ । मत्सरावेष्टितौ ।

इतः सुवर्णनगरस्वामिनः शङ्खभूपतेः ।
पृथ्वीदेवीभवा पृथ्वीसेना नाम्नी सुकन्यका ॥ ५६ ॥
भूपस्याभयघोषस्य समायाता स्वयंवरा ।
परिणीताऽतिहर्षेण तेनासौ मृगलोचना ॥ ५७ ॥
अन्यदाऽथ वसन्तर्तौ सुपुष्पवनबन्धुरे ।
ययौ क्रीडितुमुद्याने राजा राज्ञीशतान्वितः ॥ ५८ ॥
भ्रमन्त्या तत्र तत्पत्न्या पृथ्वीसेनाभिधानया ।
अदर्शि दान्तदमनाभिधानो मुनिपुङ्गवः ॥ ५९ ॥
तत्पार्श्वे धर्ममाकर्ण्य तया च प्रतिबुद्धया ।
अनुज्ञाप्य महीपालं प्रव्रज्यां प्रत्यपद्यत ॥ ६० ॥
राजाऽप्युद्यानलक्ष्मीं तामनुभूय ययौ पुरम् ।
प्राप्तश्च तन्नृहेऽन्येद्युश्छद्मस्थोऽनन्ततीर्थकृत् ॥ ६१ ॥
प्राशुकैरन्नपानैश्च स तेन प्रतिलाभितः ।
चक्रिरे पञ्च दिव्यानि तन्नृहे च दिवौकसः ॥ ६२ ॥
उत्पन्नकेवलस्यास्य समीपे स महीपतिः ।
तनयाभ्यां समं ताभ्यां प्रव्रज्यां प्रतिपन्नवान् ॥ ६३ ॥
विंशतिस्थानकैः तीर्थकरकर्म निबध्य सः ।
कृत्वा कालं ससुतोऽप्यच्युतकल्पे सुरोऽभवत् ॥ ६४ ॥
ततश्युतोऽभयघोषजीवः स्वस्याऽऽयुषः क्षये ।
राजा घनरथो जज्ञे हेमाङ्गदनृपाऽऽत्मजः ॥ ६५ ॥
जीवौ जयविजययोः सञ्जातौ वां दिवश्युतौ ।
इति तेनानगारेण तयोस्तात ! निवेदितम् ॥ ६६ ॥

ततस्तौ द्रष्टुमुत्कौ स्वामिहायातौ नभश्चरौ ।
अपश्यतां युध्यमानौ कौतुकात् [1]कुर्कुटाविमौ ॥ ६७ ॥
ताभ्यामधिष्ठितावेतौ विद्यया तस्थतुश्च तौ ।
इहैव गोपयित्वा स्वं स्वविद्याया: प्रभावत: ॥ ६८ ॥
वाक्यं मेघरथस्येदं श्रुत्वा तौ खेचरावुभौ ।
राज्ञो घनरथस्यांङ्घ्री प्रकटीभूय नेमतु: ॥ ६९ ॥
तौ पूर्वभवतातस्य तस्य नत्वा क्रमद्वयम् ।
क्षणं स्थित्वा निजं स्थानं पुनरेव प्रजग्मतु: ॥ ७० ॥
ततो दीक्षां गृहीत्वा तौ तपस्तप्त्वा सुदुश्चरम् ।
उत्पन्नकेवलज्ञानौ सनातनपदं गतौ ॥ ७१ ॥
अथ तौ कुर्कुटौ सर्वां श्रुत्वा पूर्वभवस्थितिम् ।
महापापविधातारं मनसा स्वं निनिन्दतु: ॥ ७२ ॥
प्रणम्य चरणद्वन्द्वं राज्ञो घनरथस्य तौ ।
स्वभाषयोचतुश्चैवमावां किं कुर्वहे [2]प्रभो ! ? ॥ ७३ ॥
ततो राज्ञा ससम्यक्त्वो धर्मोऽहिंसाऽऽदिलक्षण: ।
तयोर्निवेदितस्ताभ्यां भावसारं प्रतोषित: ॥ ७४ ॥
[3]प्रायं कृत्वा विपन्नौ तौ देवयोनौ बभूवतु: ।
ताम्रचूलस्वर्णचूलौ भूतौ भूताऽटवीं गतौ ॥ ७५ ॥

---

(१) कुक्कुटकुर्कुटशब्दयोः पर्यायत्वात् केषु पुस्तकेषु कुक्कुटशब्दस्य केषुचन कुर्कुटस्योल्लेखः ।

(२) क ट विभो ! ।

(३) ङ आयुःक्षये ।

ततो विमानमारुह्याऽऽगत्य नत्वा महीपतिः ।
कृतोपकारं तं प्राशंसतां विरचिताञ्जली ॥ ७६ ॥
राजानं समनुज्ञाप्य जग्मतुस्तौ स्वमाश्रयम् ।
राजाऽपि पालयामास राजलक्ष्मीमसौ चिरम् ॥ ७७ ॥
एत्य लोकान्तिकैर्देवै राजा घनरथोऽन्यदा ।
तीर्थं प्रवर्तयेत्युक्ता दीक्षाकालं विबोधितः ॥ ७८ ॥
दत्त्वा सांवत्सरं दानं राज्ये मेघरथं सुतम् ।
स्थापयित्वा स जग्राह दीक्षां देवेन्द्रवन्दितः ॥ ७९ ॥
उत्पाद्य केवलज्ञानं भविकान् प्रतिबोधयन् ।
विजहार महीपीठे श्रीमान् घनरथो जिनः ॥ ८० ॥
युक्तो दृढरथेनाथ युवराजेन सप्रियः ।
उद्याने देवरमणे ययौ मेघरथोऽन्यदा ॥ ८१ ॥
तत्राशोकतरोर्मूले निविष्टस्यास्य भूपतेः ।
पुरोभूतैः समारब्धा कैश्चित् प्रेक्षणक्रिया ॥ ८२ ॥
नानाशस्त्रधराः कृत्तिवाससो भूतिमण्डिताः ।
तेऽतीव विस्मयकरं नृत्यं विदधिरे क्षणम् ॥ ८३ ॥
तेषु नृत्यं प्रकुर्वत्सु किङ्किणीकेतुमालितम् ।
विमानमेकमाकाशादाययौ नृपसन्निधौ ॥ ८४ ॥
तन्मध्ये सुन्दराऽऽकारं नारीपुरुषयोर्युगम् ।
दृष्ट्वा पप्रच्छ कावेताविति देवी महीपतिम् ॥ ८५ ॥
राजा प्रोवाच हे देवि ! शृणु वैताढ्यपर्वते ।
उत्तरस्यां वरश्रेण्यां नगरी विद्यतेऽलका ॥ ८६ ॥

विद्युद्रथखेचरेन्द्रपुत्रस्तत्र महाभुजः ।
अयं सिंहरथो नाम्ना सर्वविद्याधरेश्वरः ॥ ८७ ॥
इयं वेगवतीनाम्नी भार्याऽस्य सहितोऽनया ।
गतोऽभूद् धातकीखण्डद्वीपेऽसौ वन्दितुं जिनम् ॥ ८८ ॥
ततो निवर्तमानोऽसौ यावदागादिह प्रिये ! ।
प्रतिघातो गतेस्तावदस्याभूत् सहसैव हि ॥ ८९ ॥
मां दृष्ट्वाऽचिन्तयदसौ सामान्योऽयं नृपो न हि ।
यत्प्रभावेण सञ्जाता विमानस्खलना मम ॥ ९० ॥
ततोऽनेन प्रहृष्टेन भूतरूपाण्यनेकशः ।
कृत्वा मम पुरस्तत्र प्रेक्षणकौतुकम् ॥ ९१ ॥
पप्रच्छैवं पुनर्देवी किमनेन पुराभवे ? ।
सुकृतं विहितं येन जाता नाथर्द्धिरीदृशी ॥ ९२ ॥
राजोवाच प्रिये ! पूर्वं पुरे सङ्खपुराभिधे ।
राजगुप्ताभिधः कश्चिद् बभूव कुलपुत्रकः ॥ ९३ ॥
शङ्खिका नाम तद्भार्या निर्धनत्वेन पीडिता ।
तौ कृत्वाऽन्यगृहे कर्म प्राणवृत्तिं वितेनतुः ॥ ९४ ॥
काष्ठाद्यर्थमथान्येद्युर्गताभ्यां काननान्तरे ।
दृष्ट्वा भक्तिवशात् ताभ्यां साधुरेको नमस्कृतः ॥ ९५ ॥
उपदिष्टस्तयोरग्रे तेन धर्मो जिनोदितः ।
विधिनाऽऽराधितश्चिन्तामणिकल्पद्रुमोपमः ॥ ९६ ॥
जन्मान्तरोपार्जितानां पापानामन्तकारकम् ।
आदिष्टं च तपो द्वात्रिंशत्कल्याणाभिधं वरम् ॥ ९७ ॥

त्रिरात्रद्वितयं तत्र भवेच्चातुर्थिकानि च ।
द्वात्रिंशदिति ताभ्यां तद् विदधे भक्तिपूर्वकम् ॥ ९८ ॥
तस्य पारणके ताभ्यां मुनिरेको गृहागतः ।
प्रणम्य प्राशुकैर्भक्तपानाद्यैः प्रतिलाभितः ॥ ९९ ॥
प्रतिपन्नाऽथ कालेन ताभ्यामप्यनगारता ।
राजगुप्तः स चाचाम्लवर्धमानं तपोऽकरोत् ॥ १०० ॥
आयुःक्षये विपन्नोऽसौ ब्रह्मलोके सुरोऽभवत् ।
ततश्युतः सिंहरथाभिधोऽयं समभूत् प्रिये ! ॥ १ ॥
शङ्खिका च तपः कृत्वा कल्पे गत्वा च पञ्चमे ।
इयं वेगवतीनाम्नी जज्ञेऽस्यैव हि वल्लभा ॥ २ ॥
इति मेघरथप्रोक्तमाकर्ण्य चरितं निजम् ।
प्रतिबुद्धः सिंहरथो गतो निजगृहं ततः ॥ ३ ॥
निवेश्य तनयं राज्ये प्रियया सहितस्तया ।
श्रीघनरथतीर्थेशपादान्ते व्रतमग्रहीत् ॥ ४ ॥
घोरं कृत्वा तपःकर्माऽवाप्य केवलमुत्तमम् ।
धौतकर्ममलः सिद्धिं ययौ सिंहरथो मुनिः ॥ ५ ॥
वनाद् गेहं समायातो राजा मेघरथोऽन्यदा ।
मुक्ताऽलङ्करणाऽऽरम्भो विदधे पोषधव्रतम् ॥ ६ ॥
मध्ये पोषधशालायाः स्थितो योगाऽऽसने सुधीः ।
पुरः समस्तभूपानां विदधे धर्मदेशनाम् ॥ ७ ॥
अत्रान्तरे कम्पमानशरीरस्तरलेक्षणः ।
संवृत्तोऽस्मि महाराज ! तवाहं शरणाऽऽगतः ॥ ८ ॥

इति जल्पन् मनुष्योक्त्या कुतोऽप्येत्य भयद्रुतः ।
पपात भूपतेः क्रोडे पक्षी पारापताभिधः ॥ ९ ॥ ( युग्मम् )
भयभीतममुं दृष्ट्वा दयालुः स महीपतिः ।
प्रोचे त्वं भद्र ! मा भैषीः कुतोऽपि मम सन्निधौ ॥ १० ॥
एवमाभाषितो राज्ञा निर्भयः समभूदसौ ।
तावत् तत्र समायातः क्रूरः श्येनाऽभिधो द्विजः ॥ ११ ॥
सोऽवदत् शृणु राजेन्द्र ! त्वदुत्सङ्गगतोऽस्ति यः ।
पारापतः स मे भक्ष्यं तं मुञ्च क्षुधितोऽस्म्यहम् ॥ १२ ॥
जजल्प भूपतिर्भद्र ! ममाऽयं शरणाऽऽगतः ।
युक्तो नाऽर्पयितुं येन पठन्त्येवं मनीषिणः ॥ १३ ॥
शूरस्य शरणाऽऽयातोऽहेर्मणिश्च सटा हरेः ।
गृह्यन्ते जीवतां नैतेऽमीषां सत्या उरस्तथा ॥ १४ ॥
परप्राणैः निजप्राणपोषणं पुण्यशोषणम् ।
तवाऽपि नोचितं स्वर्गवारणं श्वभ्रकारणम् ॥ १५ ॥
क्षिप्यमानेऽप्येकपिच्छे यथा ते जायते व्यथा ।
तथाऽन्येषामपि भवेदिदं चित्ते विभावय ॥ १६ ॥
भाविनी ते क्षणं तृप्तिः पललेऽप्यस्य भक्षिते ।
सर्वप्राणविनाशोऽस्येति चित्ते परिभावय ॥ १७ ॥
पञ्चेन्द्रियाणां जीवानां वधं कृत्वा दुराशयाः ।
गच्छन्ति नरकं जीवा इदं चित्ते विभावय ॥ १८ ॥
द्यूयते जीवहिंसावान् निषादो नरकं गतः ।
दयाऽऽदिगुणयुक्ता च वानरी चिदिवं गता ॥ १९ ॥

इहाऽऽसीदमरावत्याः शाखानगरसन्निभा ।
शाखामृग[1]शताऽऽकीर्णा हरिकान्ताऽभिधा पुरी ॥ २० ॥
तत्राभूत् पृथिवीपालो हरिपालाभिधः सुधीः ।
हरीणां पालनत्वेन यदाख्या सत्यतां गता ॥ २१ ॥
तस्यामेव पुरि क्रूरो यमकिङ्करसन्निभः ।
कृतघ्नो निर्दयश्चाभूद् निषादो नाम घातकः ॥ २२ ॥
स पापर्द्धिरतः पापो गत्वा नित्यं वनान्तरे ।
जघानानेकशो जीवान् वराहहरिणादिकान् ॥ २३ ॥
इतस्तस्मिन् पुरासन्ने वनेऽनेकद्रुमाकुले ।
भूपप्रसादबलिनो वसन्ति स्म बलीमुखाः ॥ २४ ॥
तन्मध्ये वानरी काऽपि कापेयविरता सदा ।
हरिप्रियाऽभिधानाऽभूद् दयादाक्षिण्यशालिनी ॥ २५ ॥
एकदा च निषादोऽयं नृशंसः शस्त्रपाणिकः ।
अपश्यत् पुरतो घोरं मृगारिं मृगयापरः ॥ २६ ॥
सप्राणोऽपि ततः प्राणभयभीतो द्रुतं द्रुतम् ।
नष्ट्वा क्वापि समासन्नेऽधिरूढो जगतीरुहे ॥ २७ ॥
समारोहन्नसौ तत्र पादपे समलोकयत् ।
विह्वतास्यां भयात् तस्य पूर्वारूढां हरिप्रियाम् ॥ २८ ॥
यस्य बाणप्रहारेण मातङ्गोऽपि विपद्यते ।
सोऽस्या अपि तदा भीतो यद् भयो भयमीक्षते ॥ २९ ॥

---

(१) ख घ ठ -समाकीर्णा ।

व्याघ्रात् त्रस्तं तमुद्वीक्ष्य वानरी सा झटित्यपि ।
प्रविहायात्मनः क्षोभं प्रसन्नवदनाऽभवत् ॥ ३० ॥
विश्वस्तोऽभूद् निषादोऽथ निषण्णश्च तदन्तिके ।
सा तस्य शिरसः केशान् व्यावृणोद् बन्धुवत्सला ॥ ३१ ॥
तदुत्सङ्गे शिरः कृत्वा सुप्तोऽसौ विटपाश्रितः ।
वीक्ष्य निद्रायमाणं तं व्याघ्रः प्रोवाच वानरीम् ॥ ३२ ॥
भद्रे ! नोपकृतिं वेत्ति सर्वकोऽपि महीतले ।
मनुष्यस्तु विशेषेणास्मिन्नर्थे श्रूयतां कथा ॥ ३३ ॥
एकस्मिन् सन्निवेशेऽभूत् शिवस्वामीति स द्विजः ।
स्वतीर्थवन्दनाहेतोर्निरगान्निजमन्दिरात् ॥ ३४ ॥
एकस्यां पतितोऽटव्यां तृष्णार्तोऽन्वेषयन् जलम् ।
पुराणकूपमद्राक्षीद् गूढं तरुलतादिभिः ॥ ३५ ॥
कृत्वा दाम तृणैस्तेन बद्ध्वा च करपत्रकम् ।
कूपान्तः क्षेपयामास जलार्थं सोऽजडाशयः ॥ ३६ ॥
रज्ज्वा तत्र विलग्नैको निर्ययौ कूपकात् कपिः ।
सफलोऽयं ममारम्भ इति दध्यौ द्विजोऽपि हि ॥ ३७ ॥
पुनर्द्वितीयवेलायां व्याघ्रसर्पौ विनिर्गतौ ।
ब्राह्मणस्यांघ्रियुग्मं ते प्रणेमुः प्राणदायिनः ॥ ३८ ॥
मतिमान् वानरस्तेषु जातिस्मरणपण्डितः ।
द्विजातिं ज्ञापयामास लिखित्वेत्यक्षरावलिम् ॥ ३९ ॥
वसामो मथुरोपान्ते वयं तत्र त्वयाऽपि हि ।
समागम्यं ततः किञ्चित् स्वागतं ते करिष्यते ॥ ४० ॥

कूपेऽमुष्मिन्मनुष्योऽपि पतितोऽस्ति परं त्वया।
न ह्युत्तार्य्यो यतः सोऽयं कृतघ्नः किं करिष्यति ? ॥ ४१ ॥
इत्युदीर्य ययुस्तेऽथ चिन्तयामास स द्विजः।
कथमेष मनुष्योऽपि वराको न हि क्षम्यते ? ॥ ४२ ॥
सर्वस्याप्युपकारो हि विधातव्यः स्वशक्तितः।
मनुष्यजन्मनः सारमेतदेव निगद्यते ॥ ४३ ॥
कूपे क्षिप्त्वा ततो रज्जुं सोऽप्याकृष्टो द्विजन्मना।
कोऽसि त्वं कुत्र वास्तव्य इति पृष्टो जगाद च ? ॥ ४४ ॥
अहं हि मथुरावासी स्वर्णकारोऽत्र केनचित्।
कारणेनागतः कूपे पतितः तृष्णयार्दितः ॥ ४५ ॥
कूपान्तरप्ररूढस्य शाखामालम्ब्य शाखिनः।
यावदस्यामहं तावत्ते पेतुर्वानरादयः ॥ ४६ ॥
समानव्यसनत्वाच्च त्यक्तवैराः परस्परम्।
परोपकाररसिक ! त्वया जीवापिता वरम् ॥ ४७ ॥
मथुरायां समागच्छेरित्युदित्वा ययौ च सः।
द्विजश्च क्रमयोगेण तत्र प्राप्तो भुवि भ्रमन् ॥ ४८ ॥
ततोऽसौ वानरो दत्तस्तमुद्दीक्ष्योपलक्ष्य च।
हृष्टः सम्मानयामास तत्कालं पेशलैः फलैः ॥ ४९ ॥
व्याघ्रोऽपि तस्य सम्मानं विधातुं वाटिकां गतः।
जघान चाविवेकित्वात् तत्र राजसुतं बलात् ॥ ५० ॥
तस्याभरणमादाय बहुमूल्यं सुखेन सः।
ब्राह्मणाय ददौ तस्मै जीवितव्यप्रदायिने ॥ ५१ ॥

कृतप्रणामं दीर्घायुर्भवेत्याशीर्गिरा स तम् ।
तुष्टस्तुष्टाव किं कोऽपि नोपकारेण तुष्यति ? ॥ ५२ ॥
ततश्च ब्राह्मणो नत्वा मथुरायां जनार्दनम् ।
पृच्छन् पृच्छन् पुरीमध्ये स्वर्णकारगृहं ययौ ॥ ५३ ॥
सलोभो लोलुपो दूरादीषद् दृष्ट्याऽवलोक्य तम् ।
अधोदृष्टिस्तथैवाऽस्थाद् रचयन् भूषणादिकम् ॥ ५४ ॥
ब्राह्मणः स्माह भोः ! किं नु नाडिन्धम ! न वेत्सि माम् ? ।
सम्यग् नाहं विजानामीत्युक्ते तेनावदत् पुनः ॥ ५५ ॥
येन त्वमटवीमध्ये पुरा कूपात् समुद्धृतः ।
सोऽस्मि द्विजो महाभागागतः प्राघुणिकस्तव ॥ ५६ ॥
ततोऽसावुपविष्टः सन्नीषन्नम्रो ननाम तम् ।
ढौकयित्वाऽऽसनं किं ते करोमीति जगाद च ? ॥ ५७ ॥
भूषणं दर्शयित्वाऽथ विप्रः प्रोवाच मुष्टिकम् ।
दक्षिणायामिदं लब्धं मया क्वापि कुतोऽपि हि ॥ ५८ ॥
अस्य मूल्यविधौ धीमांस्त्वमेवासि महाशय ! ।
तद्गृहीत्वा यथायोग्यं मूल्यं भव्यं प्रयच्छ मे ॥ ५९ ॥
इति तस्यार्पयित्वा तन्नद्यां स्नातुं ययौ द्विजः ।
शुश्राव स्वर्णकारश्च पटहोद्घोषणामिमाम् ॥ ६० ॥
हृत्वाऽद्य राजतनयं केनाप्यात्तं विभूषणम् ।
यस्तं वेत्ति स आख्यातु वध्योऽसौ भूपतेर्यतः ॥ ६१ ॥
इत्याकर्ण्य कलादोऽपि वितर्काऽऽकुलितोऽभवत् ।
मयैव घटितं ह्येतदिति सम्यग् विवेद च ॥ ६२ ॥

दध्यौ चासंस्तुतो मेऽयं श्रोत्रियो गोत्रिकश्च न ।
तत्कथं युज्यते कर्तुमस्यार्थेऽनर्थमात्मनः ? ॥ ६३ ॥
ततश्च पटहं धृत्वा गत्वा दत्त्वा च भूषणम् ।
राज्ञे तदपहर्तारं ब्राह्मणं तं न्यवेदयत् ॥ ६४ ॥
राज्ञाऽऽज्ञाप्य निजान् पत्तीन् स बद्ध्वाऽऽनायितस्ततः ।
पृष्टाः पौराणिकाः किं भोः ! युज्यतेऽत्र ममेत्यथ ? ॥६५॥
तेऽवोचन् वेदवेदाङ्गपारगोऽपि द्विजोत्तमः ।
महाहत्याकरो राज्ञा वध्यो नास्त्यत्र पातकम् ॥ ६६ ॥
रासभारोपितं कृत्वा राजादेशात् पदातयः ।
रक्तचन्दनलिप्तं च तं निन्युर्वध्यभूमिकाम् ॥ ६७ ॥
नीयमानो महात्माऽसौ चिन्तयामास चेतसि ।
अहो ! मे दैवदोषेण कीदृशी दुर्दशाऽभवत् ? ॥ ६८ ॥
अहो ! दुष्टस्य धृष्टस्य मुष्टिकस्य कृतघ्नता ।
व्याघ्रवानरयोः पश्य कीदृशी च कृतज्ञता ? ॥ ६९ ॥
स्मृत्वा तदुदितं वाक्यमात्मनश्चाऽऽज्ञतां पुनः ।
पश्चात्तापाऽभितप्ताङ्गः श्लोकयुग्मं पपाठ सः ॥ ७० ॥
व्याघ्रवानरसर्पाणां यन्मया न कृतं वचः ।
तेनाहं दुर्विनीतेन कलादेन विनाशितः ॥ ७१ ॥
वेश्याऽ'च्चक्रुक्कुराश्चौरनीरमार्जारमर्कटाः ।
जातवेदाः कलादश्च न विश्वास्या इमे क्वचित् ॥ ७२ ॥

---

(१) ख ठ द च -च्चाऽक्कुरा- । ग वेश्या च कुक्कूराश्चौरा । गूर्जरभाषानिबद्ध-श्रीशान्तिनाथरासनाम्नि पुस्तके तु वेश्याच्चा राजचौराश्चेत्युपलभ्यते ।

इदं पुनः पुनस्तेन पठ्यमानं निशम्य सः ।
तं च विज्ञाय तत्रस्थो भुजगोऽचिन्तयत्त्विदम् ॥ ७३ ॥
वयं येनोद्धृताः कूपात् पुराऽरण्ये महात्मना ।
स एवाद्य महीदेवो व्यसने पतितो हहा ! ॥ ७४ ॥

उक्तञ्च—

उपकारिणि विश्रब्धे साधुजने यः समाचरति पापम् ।
तं जनमसत्यसन्धं भगवति ! वसुधे ! कथं वहसि ? ॥७५॥
इत्यत्यपि गते सोऽहं कृत्वा किञ्चिद्विधानकम् ।
यास्याम्यस्योपकारस्यानृणं बुद्धिवशाद् [1]द्रुतम् ॥ ७६ ॥
ततश्च वाटिकां गत्वा क्रीडन्तीं सममालिभिः ।
लतागुल्मान्तरीभूय सोऽदशद् राजनन्दिनीम् ॥ ७७ ॥
निराधारा लतेवैषा मूर्च्छिताङ्गपतद्भुवि ।
सख्यस्तूर्णं तदाचख्युः पूत्कुर्वत्यो महीपतेः ॥ ७८ ॥
राजा च तत् समाकर्ण्य स्फूर्जथुप्रतिमं वचः ।
[2]महाशोकाकुलः काममाबाधाविधुरोऽवदत् ॥ ७९ ॥
यावन्नैकस्य दुःखस्य पारमासाद्यते मया ।
द्वितीयं ढौकितं तावच्छिद्रेऽनर्था भवन्त्यहो ! ॥ ८० ॥
मान्त्रिकास्तान्त्रिकाश्चैव समाहूता महीभुजा ।
चिकित्सा च समारब्धा तत्रैको मान्त्रिकोऽवदत् ॥ ८१ ॥

---

(१) ठ ध्रुवम् ।
(२) द महाशोकासमाबाधाविधुरो नरवरोऽवदत् ।

ममास्ति निर्मलज्ञानं तेन जानामि भूपते ! ।
योऽसौ व्यापाद्यते विप्रस्तमवैहि निरागसम् ॥ ८२ ॥
अनेन किल कान्तारे पुरा कूपात् समुद्धृताः ।
व्यालवानरशार्दूलाः कलादश्च चतुर्थकः ॥ ८३ ॥
सोऽयमत्रागतोऽपूजि वानरेण फलादिभिः ।
अस्य पूजाकृते राजन् ! हतो व्याघ्रेण ते सुतः ॥ ८४ ॥
व्याघ्रदत्तं तमादायालङ्कारमजुधीरयम् ।
पार्श्वे कृतोपकारस्य कलादस्य समागतः ॥ ८५ ॥
कलादवचसा देव ! भवता हन्तुमादरात् ।
समादिष्टोऽथ दृष्टश्च भोगिना तेन सोऽध्वनि ॥ ८६ ॥
ततश्च तद्विमोक्षार्थं दृष्टा युष्मत्सुताऽमुना ।
यद्येष मुच्यते विप्रस्तदा जीवत्यसावपि ॥ ८७ ॥
अत्रार्थे प्रत्ययः कश्चिदित्युक्ते भूभुजाऽथ सः ।
तत्रावतारयामास मान्त्रिकस्तं महोरगम् ॥ ८८ ॥
तेनाप्यनुमतं सर्वं यदुक्तं मन्त्रवादिना ।
संजातप्रत्ययो राजा ततश्चामोचयद् द्विजम् ॥ ८९ ॥
मुक्तं दृष्ट्वा द्विजन्मानमुरगो गौरवान्वितम् ।
प्रत्याजहार गरलमात्मीयं दंशधावनात् ॥ ९० ॥
अथ सा राजतनया कौमुदीबोधयं ययौ ।
राजलोकस्तदा सर्वो बभूव कुमुदोपमः ॥ ९१ ॥
तस्य द्विजन्मनश्चाग्रे कथयामास मान्त्रिकः ।
यत्ते दत्तं जीवदानं पन्नगेनामुना खलु ॥ ९२ ॥

विप्रोऽवोचदहो ! रम्यं चरित्रं देहिनामिह ।
क्रूरा अपि कृतज्ञत्वं दधत्यन्ये कृतघ्नताम् ॥ ८३ ॥
दधात्वसौ भूतधात्री द्वावेव पुरुषौ सदा ।
उपकारे मतिर्यस्य यश्च नोपकृतं हरेत् ॥ ८४ ॥
ततश्च विस्मयाद्राज्ञा पृष्टः कथयति स्म सः ।
समारभ्य प्रवासादि बन्धनान्तां निजां कथाम् ॥ ८५ ॥
पुनः स्माह महाराज ! सुखदुःखकृतौ कृतौ ।
ध्रुवं कृतान्त एवैकः सर्वेषामिह देहिनाम् ॥ ८६ ॥
तत्कथाश्रवणाद् गाढं तुष्टेनाथ महीभुजा ।
शिवस्वामी कृतः स्वामी विषयस्य गरीयसः ॥ ८७ ॥
शिवस्वाम्यपि देशे स्वे कृतज्ञैकशिरोमणिः ।
प्रावर्तयन्नागपूजाविधाने नागपञ्चमीम् ॥ ८८ ॥
कथयित्वा कथामेतां पुनर्व्याघ्रोऽब्रवीदिदम् ।
हरिप्रिये ! यथा तेन सरलेन द्विजन्मना ॥ ८९ ॥
कलादाद्विपदः प्राप्ता निषादोऽयं तथैव हि ।
विधाता ते महानर्थं तन्मुञ्चैनं ममाशनम् ॥ २०० ॥ (युग्मम्)
एवमुक्ताऽपि नामुञ्चत् साधुप्रकृतिवानरी ।
यावत्तावत् स आसीनो व्याघ्रस्तस्य तरोरधः ॥ १ ॥
इति व्यचिन्तयदहो ! तिरश्चामपि चेतसि ।
मैत्र्यादि दृश्यते बुद्धिर्दुर्लभा या तु योगिनाम् ॥ २ ॥
प्रबुद्धस्याथ दुष्टस्य निषादस्य दुरात्मनः ।
अस्खपद् वानरी साऽपि निवेश्याङ्के निजं शिरः ॥ ३ ॥

व्याघ्रोऽप्यभ्याससमागत्य तं जगाद निषादकम् ।
मित्रं मामनया कृत्वा निर्भयो भव सर्वतः ॥ ४ ॥
सप्ताहक्षुधितस्यैनां समर्पय न चेदथ ।
प्रभूतेनापि कालेन स्वगृहं न गमी ततः ॥ ५ ॥
अपरं च न सङ्कोऽस्याः शुभोदर्काय ते ध्रुवम् ।
नाश्रौषीस्त्वं पुरा किं वा वानरेण हतो नृपः ? ॥ ६ ॥
इत्यर्थे श्रूयतां भद्र ! प्रथयामि कथामहम् ।
सहर्षः स निषादोऽपि प्राहाऽऽख्याहि शृणोम्यहम् ॥ ७ ॥
पुरे नागपुरे भूपः स्वरूपजितमन्मथः ।
शत्रुवंशव्रजस्यासीद्दावाभः पावकाह्वयः ॥ ८ ॥
वाहकेल्यां शूकलेन वाजिना काननेऽन्यदा ।
बलान्नीतो नृपो दूरमध्वानं प्रविलङ्घ्य सः ॥ ९ ॥
एकाकिनो वने तस्मिन् भ्रमतो नृपतेस्तदा ।
क्षुधितस्य तृषार्तस्य मिलितः कोऽपि वानरः ॥ १० ॥
फलान्यानीय रम्याणि तेन दत्तानि भूभुजे ।
दर्शितं शुचिपानीयपूर्णं चापि सरोवरम् ॥ ११ ॥
फलान्यास्वाद्य पीत्वा च वारि हारि धरापतिः ।
आससाद परां प्रीतिं मनसस्तावदागतम् ॥ १२ ॥
तत्सैन्यं मन्त्रिसामन्तवाजिवारणबन्धुरम् ।
नीतोऽसौ वानरो राज्ञा कृतज्ञेन निजं पुरम् ॥ १३ ॥
बुभुजे सोऽथ पक्वान्नं मोदकादि मुहुर्मुहुः ।
फलानि कदलीचूतप्रमुखानि नृपाज्ञया ॥ १४ ॥

स्मरन्नुपकृतिं तां च तं सदा निजपार्श्वगम् ।
चकार नृपतिश्चैषा प्रकृतिः पौरुषी यतः ॥ १५ ॥
वसन्ते सङ्गतेऽन्येद्युः कामिनां चित्तशालिनाम् ।
ऋतौ पुष्पफलाकीर्णे कानने [1]कमिताऽऽते ॥ १६ ॥
अन्दोलजलकेल्यादि प्रक्रीड्य कदलीगृहे ।
सुष्वाप श्रमनाशाय प्लवगे वङ्गरक्षके ॥ १७ ॥ (युग्मम्)
कुधिया कपिना तेन स्वामिभक्तत्वमानिना ।
भ्रमरव्याजतो राज्ञः कृत्ता खड्गेन कन्धरा ॥ १८ ॥
यथा तेन क्षितीशेन हितादपि हि वानरात् ।
प्राप्तं तु मरणं तस्मात्तदियं श्रेयसे न ते ॥ १९ ॥
इत्याकर्ण्य कथा तेन व्याधेनाशु हरिप्रिया ।
पातिताऽस्य मृगारातेः पुरः प्रोवाच तामसी ॥ २० ॥
न धार्यं हृदये दुःखं भद्रे ! प्राप्ता त्वया ननु ।
तादृशो फलसम्प्राप्तिर्यादृशः सेवितो नरः ॥ २१ ॥
प्रत्युत्पन्नमतिः साऽथ व्याघ्रं स्माह स्वसंज्ञया ।
रक्षणीया त्वया नाहं भक्षणीयैव केवलम् ॥ २२ ॥
हितं ते वच्म्यदो वाक्यं वानराणां मृगाधिप ! ।
प्राणा वसन्ति लाङ्गूले ग्राह्यास्तत्रैव तत्त्वया ॥ २३ ॥
तथैव कृतवान् व्याघ्रः सहसा साऽपि वानरी ।
वृक्षे त्वरितमारूढा पुच्छं मुक्त्वा मुखेऽस्य तत् ॥ २४ ॥

---

(१) द कामिताऽऽप्तते ।

विलक्षवदनो व्याघ्रो व्याघुट्याऽगाददृश्यताम् ।
उत्ततार ततो वृक्षात् सनिषादा च वानरी ॥ २५ ॥
अग्रे भूत्वा तया निन्ये स स्वावासे लताश्रये ।
तस्याः शिशवस्तत्रासंस्तेषां पार्श्वे निवेश्य तम् ॥ २६ ॥
विधातुं स्वागतं तस्य सा त्वनालस्यशालिनी ।
वनमध्ये ययौ स्वादुफलानयनहेतवे ॥ २७ ॥ (युग्मम् )
जिघत्सुना निषादेन तदपत्यानि तान्यपि ।
खादितानि कुतः कृत्याकृत्यवेदी दुरात्मनाम् ? ॥ २८ ॥
फलान्यादाय स्वादूनि वानरी यावदाययौ ।
तावत्सुप्तं निषादं तमपश्यन्न च तान् शिशून् ॥ २९ ॥
तथाऽप्युत्थाप्य यत्नेन दत्त्वा चास्मै फलानि सा ।
अपत्यान्वेषणं कर्तुं सार्धं तेन प्रचक्रमे ॥ ३० ॥
पातिताऽपि पुरा वृक्षादपत्येष्वशितेष्वपि ।
प्रतिपन्नसगर्भेऽस्मिन् नाशशङ्के तथाऽप्यसौ ॥ ३१ ॥
दध्यौ चित्ते निषादोऽपि विषादाकुलितो भृशम् ।
अहो ! मेऽद्य श्रमस्तोऽपि व्यापारोऽभून्निरर्थकः ॥ ३२ ॥
रिक्त एव कथं गेहे यास्यामीति विचिन्त्य सः ? ।
[1]यष्ट्या चाहत्य हतवान् हीनस्तामेव वानरीम् ॥ ३३ ॥
तां च कावाकृतौ क्षिप्ता नीयमानां निरीक्ष्य सः ।
आविर्भूयाऽवदद् व्याघ्रः किमिदं रे कृतं त्वया ? ॥ ३४ ॥

---

(१) क ट व्यापाद्य वानरीं स्कन्धे निधाय प्रचचाल सः ॥
यावत्प्रयात्यसौ गेहं प्रति तावद्ददर्श च ।

यया त्वं पुत्रवत् पाप ! पालितो लालितश्चिरम् ।
तस्याः प्रकुर्वतो घातं किं न ते [1]शटितौ करौ ? ॥ ३५ ॥
रे पापिष्ठ ! निकृष्टात्र ! कृतघ्नाभव्य ! दुर्मते ! ।
प्रयाहि मेऽप्यवध्योऽसि त्वन्मुखं वीक्ष्यते कथम् ? ॥ ३६ ॥
निषादस्त्वागतो गेहे ज्ञात्वा तद्वृत्तमादितः ।
राज्ञा चाज्ञापितो वध्यो बद्ध्वाऽसौ बन्धनैर्दृढम् ॥ ३७ ॥
राजादिष्टैर्नरैर्यावत् स नीतो वध्यभूमिकाम् ।
तावद् व्याघ्रोऽवदद्युक्तमहो ! नैतस्य मारणम् ॥ ३८ ॥
अथ तैर्विस्मयापन्नैः कथितं तन्महीभुजे ।
स्वयं राजाऽपि तत्रागात् कौतुकोत्तानमानसः ॥ ३९ ॥
तथैव व्याजहाराऽसौ मृगराजो महीपते ! ।
पाणिनोऽस्य वधान्मा भूत्त्वमप्यंशहरोंऽहसः ॥ ४० ॥
स्वयमेव पतन्त्येव विपत्तौ पापजन्तवः ।
निमज्जति यथा तूर्णं सम्पूर्णः कलसोऽम्भसि ॥ ४१ ॥
राजा प्रोवाच हे व्याघ्र ! तिरश्चोऽपि कथं नु ते ।
प्रकृष्टा मानषी भाषा, विवेकित्वं तथेदृशम् ? ॥ ४२ ॥
व्याघ्रोऽप्येवमभाषिष्ट विशिष्टज्ञानसंयुतः ।
उद्याने सूरिरत्रास्ति स सर्वं कथयिष्यति ॥ ४३ ॥
इत्युदित्वा ययौ सोऽथ तं निषादं महीपतिः ।
पुर्य्या निष्कासयामास सुरेन्द्र इव सङ्गमम् ॥ ४४ ॥

---

(१) द त्रोटितौ ।

ततश्च वनखण्डान्तर्मूर्तं धर्ममिवाग्रतः ।
ददर्शायं परिवृतं सूरिं भूरितपोधनैः ॥ ४५ ॥
नमस्कृत्य गुरोः पादावनुज्येष्ठं मुनीनपि ।
उपविश्य च गुर्वन्ते पप्रच्छैवं कृताञ्जलिः ॥ ४६ ॥
प्रभो ! सर्वं विजानासि निर्मलज्ञानचक्षुषा ।
तेन पृच्छामि सा मृत्वा कां गतिं वानरी ययौ ? ॥ ४७ ॥
गुरुः प्रोवाच भूपाल ! मरालधवलाशया ।
धर्मध्यानपरा धन्या सुरलोकमियाय सा ॥ ४८ ॥

यतः—

तपःसंयमदानोपकारेषु निरतः सदा ।
गुरुवाक्यरुचिर्जीवो दयावांश्च दिवं गमी ॥ ४९ ॥
अपृच्छद्भूपतिर्भूयो भूयः पापपरायणः ।
जात्या च क्रियया चापि निषादाख्यः क्व यास्यति ? ॥५०॥
सूरिश्च कथयामास सर्वस्यापि स्फुटं हृदः ।
यद्यस्य पापिनः स्थानं किमन्यन्नरकं विना ॥ ५१ ॥
जीवहिंसामृषावादस्तेनान्यस्त्रीनिषेवणैः ।
परिग्रहकषायैश्च विषयैर्विषयीकृतः ॥ ५२ ॥
कृतघ्नो निर्दयः पापी परद्रोहविधायकः ।
रौद्रध्यानपरः क्रूरो नरो नरकभाग् भवेत् ॥५३॥ (युग्मम्)
प्रस्तावादपरगतिद्वयलक्षणमपि शृणु ।
[1]पिशुनो गोमतिश्चैव मित्रे शाठ्यरतः सदा ॥ ५४ ॥

(१) ठ पिशुनो दुर्विनीतश्च ।

आर्तध्यानेन जीवोऽयं तिर्यग्गतिमवाप्नुयात् ।
मार्दवार्जवसम्पन्नो गतदोषकषायकः ।
न्यायवान् गुणगृह्यश्च मनुष्यगतिभाग् भवेत् ॥ ५५ ॥
पृच्छति स्म पुनर्भूपः कथं व्याघ्रो मनुष्यवाक् ? ।
निषादसूदनाद् येन वारितोऽहं प्रभो ! बलात् ॥ ५६ ॥
जगाद पुनराचार्यो भूपते ! शृणु कारणम् ।
सौधर्मे देवलोकेऽस्ति शक्रसामानिकः सुरः ॥ ५७ ॥
तस्य प्राणप्रिया देवी श्रुत्वा क्वापि मनुष्यभूत् ।
रक्षपालाः सुरास्तस्या अपृच्छंस्तत्प्रियं सुरम् ॥ ५८ ॥
स्वामिन्नस्मिन् विमाने का भविता देवता न वा ? ।
तेन सा वानरी तेषां भाविनी देवतोदिता ॥ ५९ ॥
व्याघ्ररूपधरो भूत्वा तत्परीक्षार्थमागतः ।
एको देवस्ततो राजंस्तस्य वाग् मानुषी वरा ॥ ६० ॥
हरिप्रियानिषादाभ्यां सह तेन विनिर्ममे ।
विवादो बहुधा मायाशृगालानुचरेण च ॥ ६१ ॥
प्रतिबुद्धस्ततो राजा राज्यं न्यस्य सुते निजे ।
तेषामेव मुनीन्द्राणां पार्श्वे जातो महाव्रती ॥ ६२ ॥
हरिपालाख्यराजर्षिः पालयित्वा व्रतं चिरम् ।
सुरलक्ष्मीमवापोच्चैस्तस्मिन्नेव सुरालये ॥ ६३ ॥

इति निषादवानरी कथा ।

यथाऽसौ नरकं प्राप्तो निषादो जीवहिंसया ।
तथाऽन्योऽपि भवेत्तस्मात्त्याज्येयं सर्वथा त्वया ॥ ६४ ॥

श्रुत्वा मेघरथस्योक्तिं श्येनोऽवोचन्महीपते ! ।
धर्माधर्मविचारं त्वं करोष्येवं सुखी यतः ॥ ६५ ॥
पारापतोऽयं मद्भीतः शरणं त्वां समाश्रितः ।
बुभुक्षाराक्षसीग्रस्तः शरणं कं श्रयाम्यहम् ? ॥ ६६ ॥
राजन् ! सत्पुरुषोऽसि त्वं दुःखं कस्यापि नेच्छसि ।
रक्ष रक्ष कृपाशूर ! तदेनमिव मामपि ॥ ६७ ॥
कृत्याकृत्यं स्वयं वेत्सि किन्त्वेकं कथयामि ते ।
मादृशे क्षुधिते क्षुद्रे कीदृशी धर्मवासना ? ॥ ६८ ॥
विवेको क्रौ दया [1]धर्मो विद्या स्नेहश्च सौम्यता ।
सत्त्वं च जायते नैव क्षुधार्तस्य शरीरिणः ॥ ६९ ॥
प्रतिपन्नमपि प्रायो लुप्यते क्षुन्निपीडितैः ।
इत्यर्थे नीतिशास्त्रोक्तो दृष्टान्तः श्रूयतां प्रभो ! ॥ ७० ॥
करीरवनसंकीर्णे निर्जले मरुमण्डले ।
अवात्सीत् कूपके कापि द्विजिह्वः प्रियदर्शनः ॥ ७१ ॥
नीरासन्नबिलस्थान्तः सुखेन निवसन्नसौ ।
विदधे सर्वदाऽऽहारं भेकादिजलजन्तुभिः ॥ ७२ ॥
सुखप्राप्तिक्रते तेषामेकेन हरिणा सह ।
गङ्गदत्ताभिधानेन स मैत्रीत्वं प्रपन्नवान् ॥ ७३ ॥
कूपान्तरकृतावासा चित्रलेखा च सारिका ।
बभूव मधुरालापा तस्य सर्पस्य वल्लभा ॥ ७४ ॥

---

(१) ठ सत्यं ।

एवं गच्छति कालेऽस्याऽन्यदा द्वादशवार्षिकी ।
अनावृष्टिरभूत्तेन कूपे तत्राम्बु निष्ठितम् ॥ ७५ ॥
तस्मिंश्च निष्ठिते सर्वे जलजीवाः क्षयं गताः ।
तदाऽऽहारस्य तस्याहेर्वृत्तिच्छेदोऽभवत्ततः ॥ ७६ ॥
गङ्गदत्तस्तु शालूरः पङ्कशेषकृताशनः ।
जीवन्नन्येद्युरित्यूचे सर्पेणायं रहःस्थितः ॥ ७७ ॥
भद्राहं क्षुधितोऽत्यन्तं त्वज्जातिकृतभक्षणः ।
सा त्वनावृष्टिदोषेण विगता किं करोम्यहम् ? ॥ ७८ ॥
सोऽथ दध्यावयं क्रूरो निहन्तुं मां समीहते ।
रक्षामि स्वं ततोऽमुष्मात् कृत्वोपायं हि कञ्चन ॥ ७९ ॥
इति ध्यात्वाऽवदत् स्वामिन् ! गत्वा सिन्धुह्रदादिषु ।
निजजातिं विलोभ्याहमानेष्यामि कृते तव ॥ ८० ॥
धृत्वा चञ्चुपुटे चित्रलेखा नेष्यति तत्र माम् ।
ततस्ते प्रचुरा नित्यं प्राणयात्रा भविष्यति ॥ ८१ ॥
अथानेन समादिष्टा तदर्थं पक्षिणी सका ।
चञ्चुं कृत्वा मुमोचैनं नीत्वा क्वापि महाह्रदे ॥ ८२ ॥
नीरमध्यप्रविष्टोऽसौ संजातः सुखभाजनम् ।
तदाशयमजानत्या भणितश्चित्रलेखया ॥ ८३ ॥
एह्येहि भद्र ! शीघ्रं त्वं विधाय स्वसमीहितम् ।
कष्टेन वर्तते स्वामी सोऽथ तामित्यभाषत ॥ ८४ ॥

आख्याहि भद्रे ! प्रियदर्शनस्य
न गङ्गदत्तः पुनरेति कूपम् ।

बुभुक्षितः किं न करोति पापं ?
क्षीणा नरा निष्करुणा भवन्ति ॥ ८५ ॥
इत्यात्मचिन्तितं तस्या आख्याय पुनरब्रवीत् ।
त्वयाऽपि तस्य विश्वासो न कर्तव्यः कथञ्चन ॥ ८६ ॥
एवं राजन् ! क्षुधार्तः सन् कृत्याकृत्यं न वेद्म्यहम् ।
तदाशु प्रीणय त्वं मां यावत् प्राणा न यान्त्यमी ॥ ८७ ॥
एवं श्येनेन भणिते प्रोवाच जगतीपतिः ।
यच्छामि ते वराहारं भद्र ! त्वं क्षुधितो यदि ॥ ८८ ॥
पक्ष्यूचे नान्य आहारोऽस्माकमिष्टो विनाऽऽमिषम् ।
तदप्यानीय शूनाया दास्यामीति नृपोऽवदत् ॥ ८९ ॥
पश्यतो मेऽङ्गिनो मांसं छित्त्वा चेद्दीयते ततः ।
त्वन्निर्भर्वेदिति पुनर्वदति स्म स नोडजः ॥ ९० ॥
राजोचे यत्प्रमाणोऽयं भवेत् पक्षी तुलाधृतः ।
तावन्मात्रं निजं मांसं यच्छामि किमु ते वद ? ॥ ९१ ॥
एवमस्त्विति तेनोक्ते तुलामानाययन्नृपः ।
न्यवेशयच्च तत्रैकपार्श्वे पारापतं द्विजम् ॥ ९२ ॥
उत्कृत्योत्कृत्य देहं स्वं तीक्ष्णक्षुरिकयाऽक्षिपत् ।
द्वितीयपार्श्वे मांसं च करुणारससागरः ॥ ९३ ॥
छित्त्वा निजकमांसानि स चिक्षेप यथा यथा ।
पारापतोऽधिकतरमवर्धिष्ट तथा तथा ॥ ९४ ॥
गुरुभारममुं ज्ञात्वा खगं साहसिकाग्रणीः ।
तुलायामारुरोहाऽस्यां स्वयमेव महीपतिः ॥ ९५ ॥

तुलारूढं नृपं दृष्ट्वा सकलोऽपि परिग्रहः ।
हाहाकारं प्रकुर्वाणः सविषादमदोऽवदत् ॥ ९६ ॥
हा ! नाथ ! जीवितत्यागसाहसं किं करोष्यदः ? ।
एकस्य पक्षिणोऽस्यार्थे किमस्मांश्चावमन्यसे ? ॥ ९७ ॥
इदमौत्पातिकं किञ्चित् प्रभो ! सम्भाव्यते यतः ।
भवेन्नैतादृशो भारः क्षुद्रकायस्य पक्षिणः ॥ ९८ ॥
परोपकारकरणैरसिकः सरलाशयः ।
तथोपयोगं भूपोऽसौ न ददौ ज्ञानवानपि ॥ ९९ ॥
इदं च चिन्तयामास धन्यास्ते धरणीतले ।
निर्वाहयन्ति ये श्रेयः कार्यमङ्गीकृतं खलु ॥ १०० ॥
सर्वोऽपि स्वार्थलुब्धोऽयं चलस्नेहः परिग्रहः ।
कृतघ्नमशुचेर्गेहं देहं चापि विनश्वरम् ॥ १ ॥
अपेक्षयाऽनयोः सोऽहं स्वार्थभ्रंशं करोमि किम् ? ।
स्वसत्यां पूरयिष्यामि यद्वा तद्वा भवत्वहो ! ॥ २ ॥
अत्रान्तरे चलत्स्वर्णकुण्डलालङ्कृतश्रुतिः ।
किरीटहारकटकधारी कश्चित् सुरो वरः ॥ ३ ॥
आविर्भूय जगादैवं धन्योऽसि त्वं महीपते ! ।
तव धीर ! दयावीर ! सफले जन्मजीविते ॥ ४ ॥
येनाद्य त्वद्गुणग्रामं शशाङ्ककरनिर्मलम् ।
ईशानेन्द्रः सभामध्ये प्रशशंस सविस्मयः ॥ ५ ॥
अश्रद्दधानस्तमहं त्वत्परीक्षार्थमागतः ।
अधिष्ठितौ मया क्षिप्तौ पूर्वमत्सरिणौ खगौ ॥ ६ ॥

अथापृच्छन्नृपो वैरं कथं देवानयोरभूत् ? ।
इत्याख्याहि यतोऽस्माकं वर्तते कौतुकं महत् ॥ ७ ॥
आख्यच्च त्रिदशोऽत्रैव नगरे समभूत्पुरा ।
वणिक् सागरदत्तो विजयसेना च तत्प्रिया ॥ ८ ॥
युगलेन समुत्पन्नौ वाणिज्यकलयाऽन्वितौ ।
धननन्दननामानावभूतां नन्दनौ तयोः ॥ ९ ॥
पितरं समनुज्ञाप्य सार्थेन सममन्यदा ।
जग्मतुस्तौ वणिज्यार्थं पुरं नागपुराभिधम् ॥ १० ॥
व्यवहारं प्रकुर्वङ्गां ताभ्यामेकमुपार्जितम् ।
बहुमूल्यं तत्र रत्नं कथञ्चिद्दैवयोगतः ॥ ११ ॥
ततस्तौ तस्य लोभेनान्योन्यघाताभिलाषिणौ ।
मज्जन्तावन्यदा नद्यां विवादमिति चक्रतुः ॥ १२ ॥
एकोऽवोचन्मयैवेदं चारु रत्नमुपार्जितम् ।
द्वितीयः स्माह मयका त्वं लोभं कुरुषे वृथा ॥ १३ ॥
इत्यन्योन्यं रुषाक्रान्तौ तौ युद्धाऽरुणलोचनौ ।
पतितौ निम्नगानीरे चार्तध्यानेन संस्थितौ ॥ १४ ॥
संजातौ पक्षिणावेतौ वनमध्ये ततोऽधुना ।
मिलितौ कलहायन्तौ मया भोः ! समधिष्ठितौ ॥ १५ ॥
इत्युक्त्वा निर्जरः सोऽथ जगाम त्रिदशालयम् ।
पप्रच्छुर्विस्मयापन्नाः सभ्या मेघरथं नृपम् ॥ १६ ॥
नृनाथ ! त्रिदशः कोऽयं येन यूयं निरागसः ।
विधाय बहुधा मायां पातिताः प्राणसंशये ? ॥ १७ ॥

ततो मेघरथो राजा जगाद यदि कौतुकम् ।
भवतामस्ति तत्सावधानाः शृणुत महत्तः ॥ १८ ॥
इतो भवादतिक्रान्ते पञ्चमेऽहं भवेऽभवम् ।
अग्रजोऽनन्तवीर्यस्य बलदेवोऽपराजितः ॥ १९ ॥
तदाऽऽवयोरभूच्छत्रुर्दमितारिर्महाभुजः ।
अपहृत्य सुतां तस्य स आवाभ्यां निपातितः ॥ २० ॥
भ्रान्त्वा संसारकान्तारमिहैव भरतार्धके ।
अष्टापदगिरेर्मूले सोऽभवत्तापसात्मजः ॥ २१ ॥
कृत्वा बालतपो मृत्वा सुरूपाख्योऽमृताशनः ।
ईशानकल्पे जातोऽयं तदेन्द्रः प्रशशंस माम् ॥ २२ ॥
अश्रद्दधत्प्रशंसां तामिहायातस्ततः परम् ।
यज्जातं भवतां तद्धि प्रत्यक्षं सर्वमेव भोः ! ॥ २३ ॥
स्ववृत्तं देववृत्तं च तावाकर्ण्य विहायसौ ।
संजातजातिस्मरणौ स्ववाचैवं जजल्पतुः ॥ २४ ॥
इदं स्वचरितं स्वामिन् ! श्रुत्वा संवेग आवयोः ।
संजातोऽतिगुरुश्चित्ते यत् कर्तव्यं तदादिश ॥ २५ ॥
राज्ञोक्तं भोः ! सुदृष्टित्वं प्रतिपद्य महाशयौ ! ।
भावसारं विदधीथोऽनशनं पापनाशनम् ॥ २६ ॥
ततस्तौ विहितप्रायौ स्मृतपञ्चनमस्कृती ।
मृत्वा धन्यौ समुत्पन्नौ देवौ भुवनवासिषु ॥ २७ ॥
पौषधं पारयित्वा तं विधिना कृत्वा च पारणम् ।
भोगानभुङ्क्त भूयोऽपि राजा मेघरथः सुधीः ॥ २८ ॥

परीषहोपसर्गेभ्योऽभीतः संवेगवासितः ।
सोऽन्यदाऽष्टमभक्तेन तस्थौ प्रतिमया स्थिरः ॥ २८ ॥
अष्टाविंशतिलक्षाणां विमानानामधीशिना ।
अवान्तरे भक्तिवशादीशानेन्द्रेण जल्पितम् ॥ ३० ॥
माहात्म्यनिर्जिताऽशेषत्रैलोक्य ! गतकल्मष ! ।
भविष्यदर्हते तुभ्यं महासत्त्व ! नमो नमः ॥ ३१ ॥
तमाकर्ण्य समीपस्थाः पृच्छन्ति स्मेति तत्रियाः ।
स्वामिन् ! कस्य नमस्कारो युष्माभिर्विहितोऽधुना ? ॥३२॥
सोऽवदत् शृणु त्रैलोक्यसुन्दरि ! क्षितिमण्डले ।
नगर्यां पुण्डरीकिण्यां राजा मेघरथाभिधः ॥ ३३ ॥
कृताष्टमतपःकर्मा स्थिरप्रतिमया स्थितः ।
वर्तमानः शुभध्याने मया भक्त्या नमस्कृतः ॥३४॥ (युग्मम्)
एवंविधशुभध्यानाद् धर्मे तल्लीनमानसम् ।
शक्ताश्चालयितुं नैनं सेन्द्रा अपि दिवौकसः ॥ ३५ ॥
इत्याकर्ण्य सुरूपातिरूपे तद्वल्लभे उभे ।
क्षोभनार्थं नृपस्यास्य समीपे समुपेयतुः ॥ ३६ ॥
उत्कृष्टरूपलावण्यकान्तियुक्ते सविभ्रमे ।
सुशृङ्गारे पुरो भूत्वा तस्यैवं ते जजल्पतुः ॥ ३७ ॥
आवां देवाङ्गने स्वामिंस्त्वयि स्नेहविमोहिते ।
इहायाते ततो वाञ्छां पूरय त्वं प्रियावयोः ॥ ३८ ॥
विमुच्य त्रिदशाधीशं स्वाधीनं निजकं पतिम् ।
आवामिहागते लुब्धे त्वद्रूपगुणयौवनैः ॥ ३९ ॥

इत्यादिरागजननपेशलैर्वचनैस्तयोः ।
हावभावैश्च विविधैर्नृत्यं तस्य मानसम् ॥ ४० ॥
अनुकूलोपसर्गांस्ते विधाय सकलां निशाम् ।
प्रशान्तविक्रिये प्रातरेवं संस्तुवतः स्म तम् ॥ ४१ ॥
सरागं हृदयं चक्रेऽरागेष्वपि त्वयाऽऽवयोः ।
अहो ! चित्रं न रक्तोऽसि प्रक्षिप्तोऽप्यत्र सुन्दर ! ॥ ४२ ॥
विलीयते नरो लोहमयोऽप्यस्त्रदिचेष्टया ।
न श्लोकमपि ते धीर ! चचाल हृदयं तया ॥ ४३ ॥
क्षमयित्वाऽपराधं स्वं नमस्कृत्य तं नृपम् ।
कुर्वत्यौ तद्गुणश्लाघां जग्मतुस्ते निजाश्रयम् ॥ ४४ ॥
प्रतिमां पारयामास पीयूषं च यथाविधि ।
राजा मेघरथः प्रातर्विदधे पारणं ततः ॥ ४५ ॥
अन्यदाऽऽस्थानमासीनः ससामन्तः स भूपतिः ।
उद्यानपालकेनैवं भक्तिपूर्वकम् ॥ ४६ ॥
स्वामिन् ! संवर्धसे दिष्ट्या यदद्य नगरे तव ।
जनकः समवासार्षीज्जिनो घनरथः प्रभुः ॥ ४७ ॥
ततो दानं हिरण्यादि दत्त्वाऽस्मै पारितोषिकम् ।
कुमारसंयुतो राजा ययौ नन्तुं जिनेश्वरम् ॥ ४८ ॥
वन्दित्वा भगवन्तं तं शेषानपि तपोधनान् ।
निषसाद यथास्थानं भक्तिभावितमानसः ॥ ४९ ॥
अवान्तरे जिनः सर्वभाषानुगगिरा वरान् ।
जन्तूनां प्रतिबोधार्थं विदधे धर्मदेशनाम् ॥ ५० ॥

भो भव्याः ! इह कर्तव्यो जिनार्चननमस्कृती ।
अपूर्वपाठश्रवणे चाऽप्रमादो निरन्तरम् ॥ ५१ ॥
पुण्यात्मा यो भवेज्जीवोऽप्रमत्तो धर्मकर्मणि ।
तस्याऽऽपदपि सौख्याय शूरस्येव प्रजायते ॥ ५२ ॥
प्रस्तावेऽत्र गणधरो जिनं नत्वा व्यजिज्ञपत् ।
प्रभो ! कः शूरनामाऽसौ योऽप्रमत्तो बुधेऽभवत् ? ॥ ५३ ॥
अथावादीज्जिनो भद्र ! यदि ते श्रुतिकौतुकम् ।
तदस्याख्यानकं सम्यग् कथ्यमानं मया शृणु ॥ ५४ ॥
अस्त्यस्य जम्बूद्वीपस्य मध्यखण्डे हि भारते ।
क्षितिप्रतिष्ठितं नाम पुरं पुरगुणाञ्चितम् ॥ ५५ ॥
तं पुरं पालयामास शेषसामन्तवन्दितः ।
लोकावनैकरसिको वीरसेनाभिधो नृपः ॥ ५६ ॥
तस्यासीद्धारिणी देवी देवीव धरणीगता ।
ददर्श साऽन्यदा स्वप्ने पुरो यान्तं सुरेश्वरम् ॥ ५७ ॥
पत्युः शशंस सा स्वप्नं सोऽवादीद्भविता सुतः ।
चलेन्द्रदर्शनात्सोऽपि भावी किञ्चिच्चलाचलः ॥ ५८ ॥
जज्ञे च समये पुत्रोऽभिधानदिवसेऽस्य च ।
देवराज इति नाम चक्रे स्वप्नानुसारतः ॥ ५९ ॥
तस्मिन् प्रवर्धमानेऽपि स्वप्ने राज्ञ्यन्यदैक्षत ।
शङ्खोज्ज्वलं पुष्टदेहं निजोत्सङ्गगतं वृषम् ॥ ६० ॥
तस्मिंश्च कथिते राज्ञा भणितं देवि ! ते सुतः ।
भविष्यति महाबाहुः राज्यभारधुरन्धरः ॥ ६१ ॥

इत्यादिरागजननपेशलैर्वचनैस्तयोः ।
हावभावैश्च विविधैर्न लुब्धं तस्य मानसम् ॥ ४० ॥
अनुकूलोपसर्गांस्ते विधाय सकलां निशाम् ।
प्रशान्तविक्रिये प्रातरेवं संस्तुवतः स्म तम् ॥ ४१ ॥
सरागं हृदयं चक्रेऽरागेणापि त्वयाऽऽवयोः ।
अहो ! चित्रं न रक्तोऽसि प्रत्तिमोऽप्यच सुन्दर ! ॥ ४२ ॥
विलीयते नरो लोहमयोऽप्यस्मद्विचेष्टया ।
न श्लोकमपि ते धीर ! चचाल हृदयं तया ॥ ४३ ॥
क्षमयित्वाऽपराधं स्वं नमस्कृत्याथ तं नृपम् ।
कुर्वत्यौ तद्गुणश्लाघां जग्मतुस्ते निजाश्रयम् ॥ ४४ ॥
प्रतिमां पारयामास पौषधं च यथाविधि ।
राजा मेघरथः प्रातर्विदधे पारणं ततः ॥ ४५ ॥
अन्यदाऽऽस्थानमासीनः ससामन्तः स भूपतिः ।
उद्यानपालकेनैवं भणितो भक्तिपूर्वकम् ॥ ४६ ॥
स्वामिन् ! संवर्ध्यसे दिष्ट्या यदद्य नगरे तव ।
जनकः समवासार्षीज्जिनो घनरथः प्रभुः ॥ ४७ ॥
ततो दानं हिरण्यादि दत्त्वाऽस्मै पारितोषिकम् ।
कुमारसंयुतो राजा ययौ नन्तुं जिनेश्वरम् ॥ ४८ ॥
वन्दित्वा भगवन्तं तं शेषानपि तपोधनान् ।
निषसाद यथास्थानं भक्तिभावितमानसः ॥ ४९ ॥
अवसरे जिनः सर्वभाषानुगगिरा वराम् ।
जन्तूनां प्रतिबोधार्थं विदधे धर्मदेशनाम् ॥ ५० ॥

भो भव्याः ! इह कर्तव्यो जिनार्चननमस्कृती।
अपूर्वपाठश्रवणे चाऽप्रमादो निरन्तरम् ॥ ५१ ॥
पुण्यात्मा यो भवेज्जीवोऽप्रमत्तो धर्मकर्मणि।
तस्याऽऽपदपि सौख्याय शूरस्येव प्रजायते ॥ ५२ ॥
प्रस्तावेऽत्र गणधरो जिनं नत्वा व्यजिज्ञपत्।
प्रभो ! कः शूरनामाऽसौ योऽप्रमत्तो वृषेऽभवत् ? ॥ ५३ ॥
अथावादीज्जिनो भद्र ! यदि ते श्रुतिकौतुकम्।
तदस्याख्यानकं सम्यग् कथ्यमानं मया शृणु ॥ ५४ ॥
अस्त्यस्य जम्बूद्वीपस्य मध्यखण्डे हि भारते।
क्षितिप्रतिष्ठितं नाम पुरं पुरगुणाञ्चितम् ॥ ५५ ॥
तं पुरं पालयामास शेषसामन्तवन्दितः।
लोकावनैकरसिको वीरसेनाभिधो नृपः ॥ ५६ ॥
तस्यासीद्धारिणी देवी देवीव धरणीगता।
ददर्श साऽन्यदा स्वप्ने पुरो यान्तं सुरेश्वरम् ॥ ५७ ॥
पत्युः शशंस सा स्वप्नं सोऽवादीद्भविता सुतः।
चलेन्द्रदर्शनात्सोऽपि भावी किञ्चिच्चलाचलः ॥ ५८ ॥
जज्ञे च समये पुत्रोऽभिधानदिवसेऽस्य च।
देवराज इति नाम चक्रे स्वप्नानुसारतः ॥ ५९ ॥
तस्मिन् प्रवर्धमानेऽपि स्वप्ने राज्ञ्यन्यदैक्षत।
शृङ्गोज्ज्वलं पुष्टदेहं निजोत्सङ्गगतं वृषम् ॥ ६० ॥
तस्मिंश्च कथिते राज्ञा भणितं देवि ! ते सुतः।
भविष्यति महाबाहुः राज्यभारधुरन्धरः ॥ ६१ ॥

जातस्य समये तस्याप्यकारि जगतीभुजा ।
वत्सराज इति स्वप्नानुसारेणाभिधा वरा ॥ ६२ ॥
क्रमेण वर्धमानोऽसावष्टवर्षोऽखिलाः कलाः ।
अधीते स्म महाप्राज्ञः कलाचार्यस्य सन्निधौ ॥ ६३ ॥
अन्यदा ज्वरदाघादिरोगग्रस्तशरीरकः ।
आयुष्पर्यन्तकालत्वाद्बभूव पृथिवीपतिः ॥ ६४ ॥
दृष्ट्वा रोगार्दितं भूपं दुःखितोऽभूत् परिग्रहः ।
लोकाः सम्भूय सर्वेऽपि मन्त्रयाञ्चक्रिरे मिथः ॥ ६५ ॥
अयं हि वयसा ज्येष्ठो देवराजोऽस्ति यद्यपि ।
तथाऽपि हि गुणज्येष्ठो वत्सराजोऽस्त्वसौ नृपः ॥ ६६ ॥
जनवादममुं श्रुत्वा सहालोच्यैकमन्त्रिणा ।
स्रोचक्रे देवराजेन सैन्यं वाजिगजादिकम् ॥ ६७ ॥
तं नियुक्तकृतं श्रुत्वाऽऽरवं किमिति भूपतिः ? ।
पप्रच्छ कथयामास सर्वं परिजनोऽस्य तत् ॥ ६८ ॥
ततश्च स जगादैवं व्याध्याधिभ्यां निपीडितः ।
अहो ! अयुक्तं विदधे कार्यमेतद्धि मन्त्रिणा ॥ ६९ ॥
वत्सराजकुमारोऽयं योग्यो राज्यस्य नापरः ।
परमेतदवस्थोऽहमशक्तः किं करोमि भोः ! ? ॥ ७० ॥
इत्युक्त्वा संस्थितः सोऽथ देवराजोऽभवन्नृपः ।
विना जनानुरागेण राज्यं पालयति स्म सः ॥ ७१ ॥
चकार वत्सराजोऽपि प्रणिपातादिसत्क्रियाम् ।
पितृवद्देवराजस्य स्वभावविनयान्वितः ॥ ७२ ॥

अनुरागपरं तस्मिन् विज्ञाय सकलं जनम्।
दध्यौ मन्त्री वर्धमानो राज्यमेष हरिष्यति ॥ ७३ ॥
तदस्मिन्नहिते स्वस्य नोपेक्षा युज्यते खलु।
कोमलोऽपि रिपुश्छेद्यो व्याधिवद् बुद्धिशालिना ॥ ७४ ॥
विचिन्त्येदमसौ मन्त्री ज्ञापयामास भूपतिम्।
सोऽवदन्ननु भो मन्त्रिन्! किमत्र क्रियतामिति ? ॥ ७५ ॥
मन्त्यूचे वत्सराजोऽयं तिष्ठन्नत्र न ते हितः।
पुरान्निर्वास्यतां देव! तत्कनिष्ठोऽप्यनिष्टकृत् ॥ ७६ ॥
ततश्च देवराजेन भूभुजा भणितोऽनुजः।
गन्तव्यं त्वयकाऽन्यत्र मुक्त्वा मे विषयं पुनः ॥ ७७ ॥
भ्रातुराज्ञां गृहीत्वा तां जनन्याः स न्यवेदयत्।
तच्छ्रुत्वा दुःखिता साऽपि बभूवाश्रुमुखी क्षणात् ॥ ७८ ॥
ज्ञात्वा तां दुःखितां वत्सराजोऽवादीत्किमम्बिके!?।
एवं खेदं करोषि त्वं देह्यादेशं व्रजाम्यहम् ॥ ७९ ॥
देवी प्रोवाच हे [1]वत्स! यद्येवं त्वयका सह।
आगमिष्याम्यहमपि भगिन्या सहिता ध्रुवम् ॥ ८० ॥
वत्सराजोऽब्रवीन्मातः! स्थेयमत्रैव हि त्वया।
यदन्यदेशो विषमो देवराजोऽपि ते सुतः ॥ ८१ ॥
जनन्यूचे त्वयैवाहं सममेष्यामि वत्सक!।
नार्थो मे देवराजेन यस्त्वय्यप्यपकारकृत् ॥ ८२ ॥

---

(१) ठ पुत्र।

ततश्च देवराजेन राज्ञोद्दालितवाहना ।
चचाल धारिणी पादचारिणी सह सूनुना ॥ ८३ ॥
स हन्तव्यो मयाऽवश्यं योऽनेन सह यास्यति ।
इत्युक्ता वारितः सर्वैः परिवारस्तु भूभुजा ॥ ८४ ॥
ततश्चोच्छलितो लोकहाकारः सकले पुरे ।
स कोऽपि नाभवत्तत्र येन नो रुदितं तदा ॥ ८५ ॥
जजल्प च जनोऽद्यैतदनाथमभवत्पुरम् ।
सम्प्राप्तोऽद्यैव पञ्चत्वं वीरसेनो नरेश्वरः ॥ ८६ ॥
परित्यक्ता वयमहो ! यदनेन महात्मना ।
इति लोकवचः शृण्वन् पुराद्दत्तो विनिर्ययौ ॥ ८७ ॥
ततः शनैः शनैर्मात्रा मातृष्वस्रा च संयुतः ।
सोऽवन्तिदेशमध्यस्थामियायोज्जयिनीं पुरीम् ॥ ८८ ॥
जितशत्रुनृपस्तस्यां यथार्थाख्यः पराक्रमी ।
बभूव कमलश्रीश्च तस्याग्रमहिषी वरा ॥ ८९ ॥
बहिष्पुर्यास्तरुच्छायां विश्रान्ता साऽथ धारिणी ।
चिन्तयामास हा दैव ! किमरे ! विहितं त्वया ? ॥ ९० ॥
भूत्वाऽपि वीरसेनस्य भूपतेः प्राणवल्लभा ।
हन्तेदृश्यां दुर्दशायां ससुता पतिता कथम् ? ॥ ९१ ॥
अथ तां समनुज्ञाप्य तत्स्वसा विमलाभिधा ।
प्रविवेश पुरीमध्ये वासस्थानविधित्सया ॥ ९२ ॥
सा त्रस्तहरिणीनेत्रा वीक्षमाणा पुरीजनम् ।
श्रेष्ठिनं सोमदत्ताख्यं ददर्शैकत्र मन्दिरे ॥ ९३ ॥

शान्तमूर्त्तिममुं दृष्ट्वा सोचे तात ! विदेशगा ।
अहं मद्भगिनी तस्याः सुतश्चेहागतास्त्रयः ॥ ९४ ॥
निवासस्थानकं किञ्चिच्चेत्त्वं दर्शयसे तदा ।
सन्तिष्ठामो वयं तत्र सुखेन तव निश्रया ॥ ९५ ॥
सोऽथापवरिकामेकां दर्शयित्वा जगाद ताम् ।
स्थेयमत्र परं त्वं मे भाटकं किं प्रदास्यसि ? ॥ ९६ ॥
विमलोवाच मे भद्र ! भाटकं नास्ति किञ्चन ।
[1]किन्त्वावां त्वद्गृहे कर्म करिष्यावोऽखिलं सदा ॥ ९७ ॥
भोजनं च त्वया देयमस्माकं श्रेष्ठिपुङ्गव ! ।
ईश्वराणां तृणेनापि कार्य्यं स्यात् किन्न देहिनाम् ? ॥९८॥
एवमस्त्विति तेनोक्ते धारिणी [2]ससुता च सा ।
तस्थौ तत्र गृहे तस्य चक्रतुः कर्म ते उभे ॥ ९९ ॥
धारिणीविमले कर्मकर्य्यौ ते वणिजो गृहे ।
अभूतामुदरस्यार्थे किं तद्यत्र विधीयते ? ॥ ४०० ॥
अन्यदा वणिजा तेन प्रोक्ते ते एष बालकः ।
किं करोत्युपविष्टः सन्नस्तु मे वत्सपालकः ? ॥ १ ॥
वत्सराजकुमारोऽथ वत्सरूपाणि तद्गृहे ।
विनीतो मातृवचसाऽचारयद्वैषयोगतः ॥ २ ॥
अन्यदा वत्सरूपाणि गृहीत्वाऽगाद्दिनान्तरे ।
चरत्सु तेषु तत्राऽसौ विश्रश्राम क्षणान्तरम् ॥ ३ ॥

---

(१) द किन्तु तव गृहे ।  (२) द ससुतस्वसा ।

श्रुत्वैकत्र स्वरं राज्ञः पुत्राणां कुर्वतां श्रमम् ।
जगाम सोऽपि तत्राशु तदालोकनकौतुकी ॥ ४ ॥
तेषां मध्याद्यदा कोऽपि घाताद् भ्रश्येन्मनागपि ।
वत्सराजः समीपस्थस्तदा म्लानमुखोऽभवत् ॥ ५ ॥
घातो यदि पुनः स्थाने भवेत्तु तोषनिर्भरः ।
प्रहृष्टवदनश्चामुं प्राशंसत् साधु साध्विति ॥ ६ ॥
तद् दृष्ट्वा तत्कलाचार्यो दध्यौ कोऽप्येष कोविदः ।
बालोऽपि शस्त्रकर्माणि य एवं वेत्ति निश्चितम् ॥ ७ ॥
एवं पृष्टोऽमुना सोऽथ कुतो वत्स ! त्वमागतः ? ।
जगाद वत्सराजोऽपि तात ! वैदेशिकोऽस्म्यहम् ॥ ८ ॥
स पुनः स्माह भो भद्र ! कृत्वा प्रहरणं करे ।
आत्मनः शस्त्रकौशल्यं[1] त्वं मदग्रे प्रकाशय ॥ ९ ॥
विज्ञायावसरं सोऽपि तथा चक्रे महामतिः ।
तेषां योग्यं कुमाराणां तदा भक्तं समाययौ ॥ १० ॥
भोजितो वत्सराजोऽपि ततस्तैरात्मना सह ।
तत्कलाभ्यासमन्तुष्टैर्गुणैः सर्वत्र पूज्यते ॥ ११ ॥
सोऽस्थात्तत्र दिनं सर्वं वत्सरूपाणि तानि तु ।
रत्नपालं विना गेहे सकालेऽपि समाययुः ॥ १२ ॥
ऊचुः सदिवसेऽप्यद्य किमेतानीति जल्पिते ? ।
श्रेष्ठिना विमलोवाच नाहं जानामि कारणम् ॥ १३ ॥

---

(१) ङ ठ -ल्यमस्मदग्रे ।

अमीषां रक्षको वत्सोऽप्यागतो न गृहे यतः।
श्रेष्ठ्यूचे यदसौ बालो नाययौ तत्र [1]शोभनम् ॥ १४ ॥
प्रदोषसमये सोऽथ समायातो निजं गृहम्।
लग्ना किमियती वेलेत्यूचे मात्रा [2]ऽन्यया तथा ? ॥ १५ ॥
सोऽवदन्ननु हे मातः! सुप्तोऽभूवमहं बहिः।
केनापि बोधितो नैवाधुना जागरितः स्वयम् ॥ १६ ॥
एवं द्वितीयदिवसे तृतीयेऽपि व्यधादसौ।
तर्णकेष्वागतेषूपालभ्भं श्रेष्ठी ददौ तयोः ॥ १७ ॥
रुष्टाभ्यामथ ताभ्यां स भणितो वत्स! किं तव।
परदेशागतिः कर्मकरत्वं चैव विस्मृतम् ? ॥ १८ ॥
परवेश्मनिवासश्च तथा कष्टेन भोजनम्।
यदेवं त्वमुपालभ्भमानयस्यद्य बालक! ॥ १९ ॥
वत्सराजोऽब्रवीन्मातर्वत्सरूपाणि न ह्यहम्।
कदाऽपि चारयिष्यामीत्याख्येयं वणिजोऽस्य हि ॥ २० ॥
तया चाख्यायि तत्तस्य वत्सराजोऽपि सर्वदा।
तेषां पार्श्वे कुमाराणां यात्वा भुङ्क्ते स्म तत्र च ॥ २१ ॥
क्व गच्छसि सदैव त्वं भोजनं वा कथं तव ?।
इति पृष्टोऽम्बयाऽन्येद्युर्वत्सस्तस्यै शशंस तत् ॥ २२ ॥
अश्रुप्रपातपूर्वं च तयैवं भणितस्ततः।
कथं त्वमावयोः चिन्तां करोषि न हि पुत्रक!? ॥ २३ ॥

---

(१) ठ सुन्दरम्। (२) द तथाऽन्यया।

अन्यच्च नावयोर्गेहे सन्त्येधांसि च नन्दन ! ।
पुरवासे यतः प्रायो दुष्प्रापं स्याज्जलेन्धनम् ॥ २४ ॥
सोऽब्रवीत् श्रेष्ठिनः पार्श्वाद्याचित्वा त्वं कुठारिकाम् ।
कावाकृतिं च हे अम्ब ! समर्पयसि मे यदि ॥ २५ ॥
ततोऽहमिन्धनं सारमानयामि वनान्तरात् ।
तयाऽथ तत्तथा चक्रे ययौ सोऽप्यटवीं प्रगे ॥ २६ ॥(युग्मम्)
पश्यन्नानाद्रुमांस्तत्र स दध्यौ यदि कञ्चन ।
पश्यामि प्रवरं वृक्षं तत् क्षित्वा तस्य दारुभिः ॥ २७ ॥
रूक्षदारिद्र्यवृक्षस्य च्छेदनं प्रकरोम्यहम् ।
अम्बायास्तद्वगिन्याश्च वाञ्छितं पूरयामि च ॥ २८ ॥
तत्रैका देवकुलिका तेनाथ दृष्टा वरा ।
तदन्तर्यक्षराजश्च प्रत्यक्षो भक्तिशालिनाम् ॥ २९ ॥
तत्र दूरे समाघ्राय सुगन्धं स व्यचिन्तयत् ।
नूनमत्र वने क्वापि विद्यते चन्दनद्रुमः ॥ ३० ॥
सम्यग् निरीक्षमाणेन यतोऽसौ सर्पवेष्टितः ।
दृष्टोऽथ साहसेनैते परिक्षिप्ता महोरगाः ॥ ३१ ॥
पुरा यत्क्वचनमिति च्छिन्नो द्रुः स न केनचित् ।
चिच्छेद स तु तस्यैकशाखां साहससंयुतः ॥ ३२ ॥
विधाय काष्ठखण्डानि क्षिप्त्वा कावाकृतौ तथा ।
परितुष्टमनाः सोऽथ चचाल स्वगृहं प्रति ॥ ३३ ॥
नगर्या यावदासन्ने स समेतस्तदाऽन्तरा ।
जगामास्तं रविः पुर्य्या द्वाराणि पिहितानि च ॥ ३४ ॥

| | | | |
|---|---|---|---|
| Mārkaṇḍēya Purāṇa, (English) Fasc. 1–9 @ 1/- each ... | Rs. | 9 | 0 |
| •Markandeya Purana, Fasc. 5–7 @ /10/ each ... ... ... | | 1 | 14 |
| *Mimāṁsā Darçana, Fasc. 10–19 @ /10/ each ... ... ... | | 6 | 4 |
| Nyāyavārtika, Fasc. 1–6 @ /10/ each ... ... ... | | 3 | 12 |
| *Nirukta, Vol. IV, Fasc 1–8 @ /10/ each ... ... ... | | 5 | 0 |
| *Nitisara, Fasc. 3–5 @ /10/ each ... ... ... | | 1 | 14 |
| Nityācārapaddhatih, Fasc. 1–7 @ /10/ each ... ... ... | | 4 | 6 |
| Nityācārapradīpah Vol. I. Fasc 1–8 : Vol. II, Fasc. 1-2. @ /10/ each ... | | 6 | 4 |
| Nyayabindutikā, Fasc. 1 @ /10/ each ... ... ... | | 0 | 10 |
| *Nyāya Kusumāñjali Prakaraṇa Vol. I, Fasc. 2–6 ; Vol. II, Fasc. 1–3 @ /10/ each ... ... ... ... ... | | 5 | 0 |
| Padmawati, Fasc 1–5 @ 2 ... ... ... ... | | 10 | 0 |
| *Pariçiṣṭa Parvan, Fasc. 3–5 @ /10/ each ... ... ... | | 1 | 14 |
| Prākrita-Paingalam, Fasc. 1–7 @ /10/ each ... ... ... | | 4 | 6 |
| Prithivirāj Rāsa. Part II, Fasc 1–5 @ /10/ each ... ... | | 3 | 2 |
| Ditto (English) Part II, Fasc. 1 @ 1/- ... ... ... | | 1 | 0 |
| Prākrta Lakṣaṇam Fasc. 1 @ 1 8 each ... ... ... ... | | 1 | 8 |
| Parāçara Smṛti, Vol I, Fasc. 1–8 : Vol. II, Fasc 1–6 ; Vol III, Fasc. 1–6 @ /10/ each ... ... ... ... | | 12 | 8 |
| Parāçara, Institutes of (English) @ 1/- each ... ... ... | | 1 | 0 |
| Pariksamukha Sutram ... ... ... ... | | 1 | 0 |
| Prabandhacutāmaṇi (English) Fasc. 1–3 @ 1/4 each ... ... | | 3 | 12 |
| Rasarnavam. Fasc. 1-2 ... ... ... | | 2 | 8 |
| Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each ... ... ... | | 1 | 4 |
| *Sāma Vēda Saṁhitā. Vols. I, Fasc. 7–10 ; II, 1–6 ; III, 1–7 ; IV, 1–6 ; V, 1–8, @ /10/ each ... ... ... ... | | 19 | 6 |
| Samaraicca Kaha Fasc. 1-2, @ /10/ ... ... ... ... | | 1 | 4 |
| Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each ... ... ... | | 2 | 8 |
| Ditto (English) Fasc. 1–3 @ 1/- each ... ... | | 3 | 0 |
| •Sankara Vijaya, Fasc. 2-3 @ /10/ each ... ... ... | | 1 | 4 |
| Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each ... ... ... | | 3 | 12 |
| Sragdharā stotra (Sanskrit and Tibetan) ... ... ... ... | | 2 | 0 |
| Srauta Sutra Latyayan, Fasc. 4-9 @ /10/ each ... ... ... | | 3 | 12 |
| " " Ashalayana, Fasc. 4-11 @ /10/ each ... ... ... | | 5 | 0 |
| Suçruta Saṁhita, Eng (Fasc. 1 @ 1/- each ... ... ... | | 1 | 0 |
| Suddhikaumudī, Fasc 1-4 @ /10/ each ... ... ... ... | | 2 | 8 |
| *Taittreya Brahmana, Fasc 11-25 @ /10/ each ... ... ... | | 9 | 6 |
| " Pratiśakhya, Fasc. 1-3 @ /10/ each ... ... ... | | 1 | 14 |
| •Taittiriya Saṁhitā. Fasc. 27–45 @ /10/ each ... ... ... | | 11 | 14 |
| Tāṇḍya Brāhmaṇa, Fasc 10–19 @ /10/ each ... ... ... | | 6 | 4 |
| Tantra Vārteka (English) Fasc. 1-6 @ 1/4 each ... ... ... | | 7 | 8 |
| Tattva Cintāmaṇi, Vol. I. Fasc. 1–9, Vol II, Fasc 2–10, Vol. III. Fasc. 1–2, Vol. IV. Fasc. 1, Vol. V, Fasc. 1–5, Part IV. Vol. II, Fasc. 1-12 @ /10/ each | | 23 | 12 |
| Tattvārthadhigama Sutram, Fasc 1-3 @ /10/ each ... ... ... | | 1 | 14 |
| Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each ... ... ... | | 1 | 14 |
| Tulsi Satsai, Fasc. 1–5 @ /10/ each ... ... ... | | 3 | 2 |
| Upamita-bhava-prapañca-kathā, Fasc. 1, 5-13 @ /10/ each ... ... | | 6 | 4 |
| Uvāsagadasāo, (Text and English) Fasc. 1–6 @ 1/- each ... ... | | 6 | 0 |
| Vallāla Carita, Fasc 1 @ /10/ ... ... ... ... | | 0 | 10 |
| Varṣa Kriyā Kaumudī, Fasc 1–5 @ /10/ each ... ... ... | | 3 | 12 |
| *Vāyu Purāṇa, Vol. I, Fasc. 3–6 ; Vol. II. Fasc. 1–7. @ /10/ each ... | | 6 | 14 |
| Vidhāna Pārijata, Fasc 1–8 Vol- II Fasc. I @ /10/ each ... ... | | 5 | 10 |
| Ditto Vol. II, Fasc. 2-3 @ 1/4/ ... ... ... | | 2 | 8 |
| Vivādaratnākara, Fasc. 1–7 @ /10/ each ... ... ... | | 4 | 6 |
| Vrhat Svayambhū Purāṇa, Fasc. 1–6 @ /10/ each .. ... ... | | 3 | 12 |
| *Yoga Aphorisms of Patanjali. Fasc. 3–5 @ /10/ each ... ... | | 1 | 14 |
| Yogaśāstra of Hemchandra Vol. I. Fasc. 1-2 ... ... | | 2 | 8 |

*Tibetan Series.*

| | | | |
|---|---|---|---|
| Bandhyastotrasangraha, Vol. I ... ... ... ... | | 2 | 0 |
| A Lower Ladakhi version of Kesarsaga, Fasc. 1–4 @ 1/- each ... ... | | 4 | 0 |
| Nyayabindu of Dharmakirti. Fasc. 1 ... ... ... ... | | 1 | 0 |
| Pag-Sam S'hi Ṭiḥ, Fasc. 1–4 @ 1/- each ... ... ... ... | | 4 | 0 |
| Rtogs ḥjod dpag ḥkhri S'iḥ (Tib. & Sans. Avadāna Kalpalatā) Vol. I, Fasc. 1–6 ; Vol. II Fasc. 1–5 @ 1/- each ... ... ... | | 11 | 0 |
| Sher-Phyin, Vol. I, Fasc 1-5 : Vol. II, Fasc. 1-3 ; Vol III, Fasc. 1-6, @ 1/ each | | 14 | 0 |

*Arabic and Persian Series.*

| | | | |
|---|---|---|---|
| 'Ālamgīrnāmah, with Index. (Text) Fasc. 1–13 @ /10/ each ... ... | | 8 | 2 |
| Al-Muqaddasi (English) Vol I. Fasc 1–3 @ 1/- each ... ... | | 3 | 0 |
| Ain-i-Akbari, Fasc. 1–22 @ 1/8 each ... ... ... ... | | 33 | 0 |
| Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5. @ 2/- each ... ... ... ... ... | | 34 | 0 |

*The other Fasciculi of these works are out of stock and complete copies cannot

| | | |
|---|---|---|
| Akbarnāmah, with Index, Fasc. 1–37 @ 1/8/ each ... ... | Rs. 55 | 8 |
| Ditto (English) Vol. I, Fasc. 1–8 ; Vol. II, Fasc. 1-6 @ 1/4/ each | 17 | 8 |
| Arabic Bibliography, by Dr. A. Sprenger, @ /10/ ... ... ... | 0 | 10 |
| *Bādshāhnāmah, with Index. Fasc. 1–19 @ /10/ each ... ... | 11 | 14 |
| Conquest of Syria, Fasc. 1-9 @ /10/ each ... ... ... | 5 | 10 |
| Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each ... ... | 2 | 0 |
| Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each ... ... ... | 3 | 0 |
| Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each | 31 | 8 |
| Farnang-i-Rashīdī, Fasc. 1–14 @ 1/8/ each ... ... ... | 21 | 0 |
| Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1–4 @ 1/- each ... | 4 | 0 |
| Futūḥ-ush-Shām of Wāqidī, Fasc 1–9 @ /10/ each ... ... | 5 | 10 |
| Ditto of Āzādī, Fasc. 1–4 @ /10/ each ... ... ... | 2 | 8 |
| History of Gujarat ... ... ... ... ... | 1 | 0 |
| Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ... | 0 | 12 |
| History of the Caliphs, (English) Fasc. 1–6 @ 1/4/ each ... ... | 7 | 8 |
| Iqbālnāmah-i-Jahāngirī, Fasc. 1–3 @ /10/ each ... ... ... | 1 | 14 |
| Iṣābah, with Supplement, 51 Fasc. @ 1/- each ... ... ... | 51 | 0 |
| Ma'āṣir-i-' Ālamgirī, Fasc. 1–6 @ /10/ each ... ... | 3 | 12 |
| Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each ... ... ... | 35 | 0 |
| Maghāzi of Wāqidī, Fasc. 1–5 @ /10/ each ... ... ... | 3 | 2 |
| Muntakhabu-t-Tawārikh, Fasc. 1–15 @ /10/ each ... ... ... | 9 | 6 |
| Ditto ( English ) Vol. I, Fasc. 1–7 ; Vol. II, Fasc. 1–5 and 3 Indexes ; Vol. III, Fasc. 1 @ 1/ each ... ... ... | 16 | 0 |
| Muntakhabu-l-Lubāb, Fasc. 1–19 @ /10/ each ... ... ... | 11 | 14 |
| Nukhbatu-l-Fikr, Fasc. 1 @ /10/ ... ... ... ... | 0 | 10 |
| Nizāmī's Khiradnāmah-i-Iskandari, Fasc. 1–2 @ /12/ each ... ... | 1 | 8 |
| Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott ... ... | 5 | 0 |
| Riyāzu-s-Salātīn, Fasc. 1–5 @ /10/ each ... ... ... ... | 3 | 2 |
| Ditto (English) Fasc. 1–5 @ 1/ ... ... ... | 5 | 0 |
| Tabaqāt-i-Nāṣirī, ( English ), Fasc. 1-14 @ 1/- each ... ... | 14 | 0 |
| Ditto Index ... ... ... ... ... | 1 | 0 |
| Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc. 1–7 @ /10/ each ... | 4 | 6 |
| Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāi Aif. Fasc. 1–6 @ /10/ each ... | 3 | 12 |
| Ten Ancient Arabic Poems, Fasc. 1–2 @ 1/8/ each ... ... ... | 3 | 0 |
| Tuzuk-i-Jahāngirī, (Eng ) Fasc. 1 @ 1/ ... ... ... ... | 1 | 0 |
| Wis-o-Rāmīn, Fasc. 1–5 @ /10/ each ... ... ... | 3 | 2 |
| Zafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /10/ each ... ... | 10 | 10 |

## ASIATIC SOCIETY'S PUBLICATIONS.

| | | | |
|---|---|---|---|
| 1. | Asiatic Researches. Vols. XIX and XX @ 10/ each ... ... | 20 | 0 |
| 2. | Proceedings of the Asiatic Society from 1870 to 1904 @ /8/ per No. | | |
| 3. | Journal of the Asiatic Society for 1870 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8). 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members | | |

*N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.*

| | | | |
|---|---|---|---|
| 4. | Journal and Proceedings, N. S., 1905, to date, ( Nos. 1-4 of 1905 are out of stock ), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members. | | |
| 5. | Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members. | | |
| 6. | Centenary Review of the Researches of the Society from 1784-1883 ... | 3 | 0 |
| 7. | Catalogue of the Library of the Asiatic Society, Bengal, Part I, A to E ; Part 2, F to M ... ... ... ... | 4 | 0 |
| 8. | Moore and Hewitson's Descriptions of New Indian Lepidopters, Parts 1–III, with 8 coloured Plates, 4to. @ 6/ each ... ... | 18 | 0 |
| 9. | Kaçmīraçabdāmṛta, Parts I & II @ 1/8/ ... ... ... | 3 | 0 |
| 10. | Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad-i-Kirmasi, and edited with notes by Major D. C. Phillott. ... | 10 | 0 |
| | Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each ... ... | 34 | 0 |
| | Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... | 5 | 0 |

*N.B.*—All Cheques, Money Orders, &c. must be made payable to the "Treasurer, Asiatic Society," only.

28-7-10.

**Books are supplied by V. P. P.**

BL
1373
S45A6
1909
v.3

Ajita Prabhācārya
Shāntināthacaritram

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

UTL AT DOWNSVIEW
D RANGE BAY SHLF POS ITEM C
39 15 02 15 07 020 0